त्युक्तं ८ तत्स्वप्नवस्तुसम्वेदितुं पर्यालोचयितुं ९ अंबरे अव्यक्ताकाशे सर्गान् ब्रह्मांडान् स्थित्याप्तान्त्रमविसदृक्कृतपाल
नादिव्यवस्थया निरर्गलान्निप्रतिबंधात् १० अत्र तत्र उत्पद्यमानभूतपंक्तयश्चतुर्विधप्राणिनिकायापेषु जलजालेषु जल

उरामयाहि भगवान्पृष्टः कमलसंभवः इमे कथमुपायां ति ब्रह्मन्नसर्गगणा इति २ तदुपाश्रित्य भगवान्ब्रह्मा
लोकपितामहः रोदं वाख्यानसहितं मामुवाचवचः वच ३ ॥ **ब्रह्मोवाच** ॥ सर्वं हि मनसवेदं इदं स्फुरति भूतिमत् ॥
जलं जलाशयस्फारे विचित्रैश्चक्रकैरिव ४ दिनादौ संप्रबुद्धस्य संसारे स्रष्टुमिच्छतः पुरा कल्पे हि कलिंश्चिद्वृत्तं
किं वृत्तमंगमे ५ कदाचिद्दिवसेसर्गसंहृत्यदिवसक्षये एकएवाहमेकाग्रः स्वस्थस्तामनपन्निशां ६ निशांते संबुद्ध
त्वासंध्यां कृत्वा यथाविधि ॥ प्रजाः स्रष्टुं दृशौ स्फारे व्योम्नि योजितवानहं ७ यावत्पश्यामि गगनं नता भिन्नतेजसा व्या
प्तमत्यंत विततं शून्यमंतविवर्जितं ८ सर्गं संकल्पयामीति मतिं निश्चित्य तन्मया समवेत्तितुमारब्धं सूक्ष्मेणाचेत
सा ९ अथाहं दृष्टवांस्तत्र मनसा विततेंऽबरे पृथग्विस्थितान्महारंभान् सर्गान् स्थितिनिरर्गलान् १० तेषु मत्प्रतिबिंबा
भाः पद्मकोशनिवासिनः राजहंसान्समारूढाः संस्थिता दशपद्मजाः पृथक्स्थितेषु सर्गेषु तेषु घट्टतपंक्तिषु जल
जालेषु सङ्घेषु जगत्सु जलदादिषु १२ प्रवहंति महानद्यः प्रध्वनंति नथाध्वयः प्रतपंत्युष्णरश्मयः प्रस्फुरंत्यवरे निला
१३ दिवि क्रीडंति विबुधाः भुवि क्रीडंति मानवाः दानभोगिनश्चैव पातालेषु च संस्थिताः १४ कालचक्रपरिभ्रांता

दलालेषु छांदसोदलोदलोपः अथवा जलानां जालमिव वंधनेषु मेघेषु सङ्घेषु वग्रहादि दोषनिर्मुक्तेषु १२ प्रकर्षेण स्फुरंति संच

2.40

उक्तमर्थं व्यतिरेकमुखेनाप्युपपादयति त्यक्तोपमानमिति यद्वाक्यं त्यक्तोपमानं दृष्टांतोपन्यासरहितं अमनोज्ञाविशदशास्त्रासंग तानि कठोरवर्णानि द्विघटिताविवायद्वा नियतलिंसस्थाविघंद्युरापमनभिव्यक्तवर्णत्वात्स्फुटतया श्रोत्रेणाप्रग्रहमशक्यं क्लोधावेशात्तद्ध्वंसत् धराविघुरितं स्वस्थानविच्युतवर्णं विनिजीर्णवर्णं ग्रस्तास्वरं संस्कृतः कलाध्मातइत्यादिमहाभाष्योक्तस्वरवर्णदोषाणामुपलक्षणमेतत् तथाचाहुः ग्रस्तं निरस्तम विलंबितं दुतं अस्कृतं ध्मानमथो विकंपितं विस्रस्तमेणीकृतमर्द्धकंहतं विकर्णमिताः स्वरदोषभावनाइतिः एताद्दशं तद्वाक्यं श्रोतुर्हृदयं नयाति नानुरंजयति महतापि श्रमेणोपन्यस्तं प्रविनाशं नैष्फल्यं वा चाटत्वादिदोषमयफलतां वा याति किलेति प्रसिद्धौ स्पष्टार्थं इति दर्शयति आज्यमिवेति ४६ व्यतिरेकमुखोपपादित

भ्रांतिमात्रं तनोतीदं जगद्वचोभेदमनाद्दत्य यदिदं वच्मितेऽशृणु यतः कुतश्चिदुद्धायगं धर्वपुरवन्मनः ४६ त्यदाख्यं स्वप्नजंभणं यथाचेतस्तनोतीमां जगन्मायां तथानघ शृणुत्वं कथयामीमं दृष्टांते दृष्टिवेदने ४७ त्यक्तोपमानममनोज्ञपदं दुरापं न्यूनं घराविघुरितं विनिगीर्णवर्णं श्रोतुर्न याति हृदयं प्रविनाशमेति वाक्यं किलाज्यमिवभस्मनि हूयमानं ४८ आख्यानिकानि भुविकानिकपाश्नपायाघ त्यमेयसुचितंपरिपेलवं वा दृष्टांत
दृष्टिकथनेन तदेति साधो प्राकाश्यमाशु भुवनं सितरश्मिनेव ४९ मोक्षोपायेस्थूलत्पत्तिप्रकरणे मनोंकुरोत्पत्तिकथनंनामचतुराशीतितमः सर्गः ८४ श्रीवसिष्ठउवाच। पुरा मे ब्रह्मणा प्रोक्तं सर्वं तत्कथयानघ २

मर्थं पुनरन्वयोक्त्या निगमयति आख्यानकानीति नानाकथाभिरुपेता महत्यो भारतादिकथाः आख्यानकानि अल्पास्तुकथाः उचितं अभिज्ञातुं रंजनोपयुक्तं पद्यकाव्यनाटकाध्यात्मनिबंधादिरूपं परिपेलवं शब्दतोर्थतश्च कोमलंच पद्यश्रुत्यप्रमेयं तत्सर्वं दृष्टांतानां लोकप्रसिद्धप्रमाणद्दष्टीनां च कथनेन प्राकाश्यं स्फुटद्दष्टायं तामेतीत्यर्थः ४७ इतिश्रीवासिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे चतुरशीतितमः सर्गः ८४ सृष्टिं चिकीर्षतो धातुर्देशब्रह्मांडदर्शनं तत्रैकस्य वि

प्रोक्तं जगतो मनोमात्रत्वं तत्सर्वं तत्कथया तेन ब्रह्मणो कथैवं दवीपाख्यानकथया प्रवक्ष्यामीति योजना १

यदिदं तत्प्रवक्ष्यामित्यर्थः पृच्छति राघव १

णा तेषां तल्लोकिश्चात्रवर्णिते प्रतिज्ञातमेवं द्वीपाख्यां वक्तु
ण्यपञ्चकमतेपरेत्यादिनाहे २ अनघ ब्रह्मणा मे पुरा यदिदं

वा०टी०
उ०प्र०
२४४

बहुत्रिभुवनगर्त्तविभागेषु स्थिता निभृतानि बीजस्थानीयानि यानि येषु तथा लोकाः ब्रह्मांडाः जाता स्फुरणानि तेजांसि येषु तथाविधाः संतः कांतिकाः प्रकाशमानाः दाडिमफलानीव विलोकंत इत्यर्थः २५ तडित्तरणवपुष्या तोयेषा तथाविधा मेघपल्लवाः दिग्लतासु वातान्तीः संत इतश्चेतश्च गच्छंति शीर्यंते प्रोद्भवंति चेति योजना २७ तत्र प्रतिभातं जगन्मिथ्यैवेति दर्शयति गंधर्वेति सासमुद्रभूमिनभसांपदवी वितानशालिनी गंधर्वनगरोद्यानलतेव प्रविराजते न वास्तवीत्यर्थः लोकांतरेषु भुवनगर्भेषु २८ तेषु

बहुगर्त्तविभागस्थभूता लोकाः पृथक् पृथक् जातास्फुरणा विलोक्यंते दाडिमानीव कांतिकाः २५ त्रिप्रवाहा त्रिपथगाकृतोर्ध्वाधोगमागमः जगद्घ्नो पर्वताभास्फुरंती द्युकलामला इतश्चेतश्च गच्छंति शीर्यंते प्रोद्भवंति च दिग्लतास्तडित्पुष्पवानाम्नो मेघपल्लवाः २७ गंधर्वनगरोद्यानलता वितानमालिनी समुद्रभूमिनभसां पदवी प्रविराजते २८ लोकांतरेषु संघेत देवासुरनरोरगाः उदुंबरेषु मशका इव घुंघुमिताः स्थिताः २९ युगकल्पक्षणलवकलाकाष्ठाकलंकितः कालो विहत्य कलितसर्वनाशप्रतीक्षकः ३० एवमालोक्यसर्वज्ञेन परेण स्वेन चेतसा भृशं विस्मयमापन्नः किमेतत्कथमित्यलं ३१ कथं मांसमयेनाक्ष्णा यन्न पश्यामि किंचन तन्मायाजालमस्तु लं पश्यामि मनसा वरे ३२ अथालोक्य चिरं कालं मनसैवाहमंबरात् अर्कतिस्माज्जगज्जालादेकमानीय पृष्टवान् ३३ आगच्छ देवदेवेश भो भास्कर महाद्युते स्वागतं ते त्विति प्रोक्तो मया सौ कल्पितोप्यथ ३४ ॥ ॥

लोकांतरेषु युगादिलक्षणः कालोपि प्रवहतीत्यर्थः अकल्पितस्य अतर्कितस्य सर्वनाशस्य प्रतीक्षकः विस्मयमापन्नो अहमिति शेषः ३१ विस्मयमेव सहेतुकमभिव्यक्तं दर्शयति कथमिति मांसमयेन चक्षुर्गोलकविशिष्टेनाक्ष्णा यन्न पश्यामि तन्मनसा पश्यामि इदं कथं संपन्नमिति विस्मय इत्यर्थः ३२ अंबरं एतद्भुवनाकाशात् आनीय सत्यसंकल्पेन पुरः संनिधाप्य ३३ स्वागतं ते त्विति प्रथमं प्रोक्त अथ वक्ष्यमाणमर्थं कल्पितः पृष्टश्च ३४ ॥ ॥ रामजी सहाय॥

२४५

शुभा विहिताः अशुभा निषिद्धा आचारास्तद्विभागकः स्मृति ॥ः ग्रंथास्तंककुभंप्रति दिशंसर्वत्र सर्वत्र प्रौढतांसमुपाग
ताः २६ यथाक्रमं यादृशोयासांप्रवृत्तिक्रमः स्वसर्गत्क्रमस्तमनतिक्रम्येत्यर्थः २७ कल्पांतंप्रलयंकालेन एष्यमाणा अपि स्वका
ले कृतत्वएरवंयथास्यात्तथास्फुरंति २८ तमः क्वचि त्प्रमार्तदेशेहासितं अपदस्यपंकचिद्धिरिहादौ कुंजेषुतत जोलवैरात
याक्षिद्वैरादृतं सेहासिलितमित्यर्थः २९ अर्थात्सरस्त्वे नजगद्वर्णयतिनभइति ३० मेरुरिवोद्भूयात्मेरुहिमवांस्तत्कुलेषु अपि
लाफलकर्रिरंतत्कोटरेष्विव ३१ लोकालोकाद्रिरेवरसनाकांची यस्याः रणतोऽर्णवाएवघुंघुमाभूषणाध्वनयोयस्याः तमः

प्रौढ्यंशुभाशुभाचार स्मृतयः ककुभंप्रति नरकस्वर्गफलदाः सर्वत्रसमुपागताः २६ भोगमोक्षफलार्थिभिः समस्ता
भूतजातयः स्वमीहितंयथाकालं प्रयतंतेयथाक्रमं २७ सप्तलोकास्तथाद्वीपाः समुद्रागिरयस्तथा अप्येष्यमाणाः
कल्पांतंस्फुरंत्युरुतरारवं २८ क्वचिद्धासितमायातं क्वचित्स्थिरतरंस्थितं स्थितंसर्वत्रकुंजेषुतमस्तेजोलवाहृतं २९
नभोनीलोत्पलस्यांत भ्रमंद्भ्रममधुव्रतं प्रस्फुरत्तारकाजालकेसरापूरणं ३० कल्पांतघननीहारोमेरुस्तुकुंजेषुसंस्थि
तः शाल्मलेरमलंतूलम क्षिसाकोटरेष्विव ३१ लोकालोकाद्रिरसनारणदर्णवघुंघुमा तमः खंडेंद्रनीलाभ्नि
जरत्नविराजिता ३२ धानाधरसुधाभूतरवकाकलिघुंघुमा संस्थितामवनाभवनाभोगेस्वांतः पुरेऽंगना ३३
जौरांगपंक्तिर्मध्यस्थारजनीराजिराजिता पयोत्पलसजड्वलच्चूतेवत्सरश्रियः ३४ ॥ ॥ ॥

खंडाः पूर्वेंद्रनील मणिप्रभा यस्याः निजैः स्वांतर्गतैरत्नैश्च विराजिता ३२ धानाः शाल्मादिवीजास्तेषांप्राणोनामास्वादनीयत्वादध
रसुधायस्याः भूतानांप्राणिनांरवा धनयएवकाकलिघुंघुमाः मधुरास्फुटवा च्लिलासायस्याः सातथाविधा अर्थदृतस्मिन्भुव
नाभोगेस्वांतः पुरे अंगनेसंस्थितेत्यर्थः ३३ वत्सरश्रियः संवत्सरलक्ष्म्याः कंठधृतायां तमः प्रकाशलक्षणपद्मोत्पल निर्मितायाः
स्रजोमध्यस्थाअंतर्निविष्टा अतएवतत्तदीयपरासदृशाघुन्नतत्वादिष्वात्मत्वाद्रजनीराज्यारिद्रालेपनप्रायेणरात्रिसंकृहांगरागेण
रंजिताजौरराणांकंठकुचादस्वलेनापंक्तिरिव अपीतधौलस्पतइत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

वा०टी० ६ अंशं ऊर्ध्वभागं भूते: प्राप्तोसि तरो: स्थितिरिव स्थिति: स्थैर्यं पयोस्तो ७ तरुस्थितिमेवोपपादयति एकमिति दिवसपर्य
उ०प्र० यंदन्नचरमभागेवाग्नी रक्षसंबंधिनी तत्सदृशामितियावत् ८ द्वियुगेगते एवेतियोजना चिरंतपस्तुं शिवप्रवरलाभार्थं ९ उद्देशं
२४५ पुष्पाकरोवसंतइव ११ उमयासहितं सोमं कुमुदकैरवेविका विकाशराएवदृष्टांते दर्शनं १२ द्यावापृथिवीवितपनेनतस्यांजना
लक्ष्यंते तद्रूपं चंद्रं १३ पवनेनमलयानिलेन आधूतानां ईषत्कंपितपल्लवानां रसालादिवृक्षाणां आननमिव कूजतां भ्रमर

मू० त्वी गौरीसुश्रुषुश्चापि भूमावारललतायथा तौततौदंपती खिन्नौपुत्रार्थं तपसोगिरे: कैलासस्यांशमारूढौरू
१२ द्वाविंनवद्रुमौ भूतेरनावृतेभूम्येतस्मिन्कैलाशकुंजरे तेपतुस्तौ तपोघोरं जलाहारौ तरुस्थिती ७ एकंपानीय
चुलकंपीत्वा दिवसपर्यये निष्पंदसुस्थितौ द्वी चरतिमाश्रितसंस्थितौ ८ तस्थतुस्तौ तदातत्र तावत्कालंतरुव्रतौ या
वत्रेता चापरंचयुगे द्वे एवतेगते ९ ततसुष्टोभवेद्देवस्तयो: शशिकलाधर: दिनातपातापितयोरिंदुकुमुद्योरिव १०
आजगामतमुद्देशं यत्रतौ विप्रदंपती सलतापादपदेशं पुष्पाकइवेश्वरं ११ दंपतीतौ वृषारूढं सोमं सोमार्धशेख
रं ऊल्लासनौ ददृशतु: कुमुदे शशिनं यथा १२ तौतं प्रणेमतुर्देवं तुषारामलमीश्वरं द्यावापृथिव्यावुद्भिन्नपरि
पूर्णमिवोडुपं १३ तज्जयमवनाधूतनववृक्षाननस्वरं मृदूहासस्मितस्यं द्विजौ वाचायवक्व: शिव: १४ ईश्वर
उवाच ॥ वरंविप्रगृहाणाशु तुष्टोस्मितववांछितं मधुमासरसाक्रांतवृक्षवन्मुदितोभव १५ ॥ विप्रउवाच ॥ ०
भगवन्देवदेवेश दशपुत्रामहाधिय: भव्याभवंतु मेभूय: शोकोपेननवाधते १६ भानुरुवाच ॥ अथैवमस्त्विति
प्रोच्यजगामांतर्द्धिमीश्वर: व्योम्निवारिनिधिर्हीदक्षत्वेवोर्मिसहावपु: १७ ॥ ॥ ॥ ॥

कोकिलादीनांस्वरंयस्यवचोमाधुर्यं तियेनतज्जय निर्भ्रंसंपन्निवभ्रहूनाउदमिनसौंदर्यी लक्षेनरसितेनस्यंदिइक्षत्र
लिताधरंयथास्यात्तथा १४ तववांछितं द्रष्टुं वरंगृहाण १५ भव्या: कल्याणगुणाचारशालिन: येनपुत्रलाभेन १६ यो

तमेवार्थं दर्शयति क इति इदं त्वदीयं जगत्कथं जातं एवमन्यानि नव जगंति कथं जातानि कैः स्रष्टृभिः सृष्टानीत्यर्थः ३५ मां संपरिज्ञा
तवान् अस्य ब्रह्मा अयमिति शेषः ३६ नित्यं शश्वत् ३७ लीलाश्रवणे कौतूहलं अचिंतता त्वया असंकल्पितां ३८ व्यवहारे सर्वशक्ति
मत्त्वादीश्वरात्मन् परमार्थदृशा तु महात्मन् अविरताः जगद्रचनायामप्रस्तुता विधाभिः सदिति वा असदिति वा तत्त्वतोऽवबोधेन न विमोह
दानशीलाभिः कदाचित्सत्कदाचिदसत्सत्क्वचिदसदिति कालदेशपरिच्छिन्नजगत्सत्ताप्रदर्शनकौशलरूपाभिः कलाभिर्यत्

कस्त्वं कथमिदं जातं जगदेवं जगंति च यदि नासि भगवंस्तदुक्तं कथयानघ ३५ इत्युक्तो मां सलोकसंपरिज्ञातवानघ न
मस्कृत्वाभ्युवाचेदममिंघपदया गिरा ३६ भानुरुवाच ॥ असद्रूपप्रपंचस्य नित्यं कारणतामसि गतः कस्मान्न जानी
षे किं मामीश्वर पृच्छसि ॥ प्रथमब्राक्संदर्भे लीला चेन्नव सर्वग अचिंतितां मदुत्पत्तिं तच्छृणुष्व वदाम्यहं ३८ सदसदि
तिकलाभिराततं यत्सदसद्वोधविमोहदायिनीभिः अविरतरचनाभिरीश्वरात्मन्न विलसतीह मनोमहन्महात्मन् ३९
मोक्षोपाये उत्पत्तिप्रकरणे ब्रह्मादित्यसमागमः सर्गः ८५ श्रीभानुरुवाच ॥ कल्पनाम्नि महादेवस्य सानेद्दिवसे तव तले
कैलासशैलस्य जंबूद्वीपैककोणके १ सुवर्णजटनाम्नायः स्त्वत्पुत्रैर्जनितप्रजैः मंडलं कल्पितं श्रीमदनल्पसुखसुंदरं २
तत्राभूदतिधर्मात्मा ब्राह्मणो ब्रह्मवित्तमः इंदुर्नामा विशांतात्मा कश्यपस्य कुलोद्भवः ३ तस्मिंस्तत्र निवसतो नित्यं स्वज
नमंडले तस्य प्राणसमा भार्या कांचित्त्वं सा महात्मनः ४ नवभूवात्मजस्तस्य मरुभूमौ तरुर्यथा नव्यराजत सा भार्या तस्यनि

इह अस्मिन् समंतात् आततं विस्तृतं तन्मन एव तथा प्रविलसतीति चिद्धीत्यर्थः ३९ ॥ इति श्रीवासिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे पंचाशी
तीतमः सर्गः ८५ ॥ इहेंदोः सहभार्यस्य तपसैंदवसंभवः तेषां स्वप्नोपदेशेन धात्रेहं भावने यते जंबूद्वीपैककोणके विषमा
नस्य कैलासशैलस्यावयवभूते तत्तले समभूप्रदेशे २ पः प्रदेशः सुवर्णजटनाम्ना प्रसिद्ध इति शेषः यत्र प्रदेशे जनिताः प्रजाः
संततिर्येषां तथाविधैस्त्वत्पुत्रैर्मरीच्यादिभिः प्रजानां निवासार्थं मंडलं कल्पितमित्यर्थः २ तत्र मंडले ब्रह्मवित्तमो वेदवित्कुशः २४
शून्याफलशून्याशरलताकाशास्तंभः ५

ग०टी०
उ०प्र०
२५६

आकल्पं आप्राकृतप्रलयं हेभ्रातरः ब्रह्मत्वं हिरण्यगर्भता ३१ भाग्यवशादितरेषामपि तत्राभिरुत्सन्नेत्याह एतद्वितेतद्ब्रह्म
इति पाठे समहामतिरेषोनमो ज्येष्ठः श्रेष्ठश्चयेषां ३२ अतएवतदुपायनपृष्ठ नित्याहऊचुरिति सर्वेषी जरामरण
सातिशयत्वादिप्रयुक्तदुःखान्नुपमृज्यन्ते यस्मिन्नित्यधिकरणे ल्युट् अवामुम इतिशीघ्रंमाप्स्यामः पर्वतमानसा
मीप्यत्वंचत्वया लट् ३३ तेभ्यउपगतेभ्योहिरण्यगर्भोहंयत्तोपाप्तिंसपरिकराम्रुपदेक्ष्यंसत्वंगमाप्स्यतेज्ञीरण्णदायीविधत्ते
मदुक्तमितिवैइतितत्रहेतुनिश्चयापेक्षाद्योतनार्थो सृजामिसंहरामीतिलेंगात्सकर्तृविघ्यमुपदिष्टेतिगम्यते इतिशब्दात्

रेश्वर्याणां हिसर्वेषामाकल्पंनवि नाशियत् सेचतेभ्रातृस्तन्मेब्रह्मत्वमितरनेतरत् ३१ एतदुक्तंतदत्वि
लाद्विजपुत्रास्तउत्तमाः वचोभिरेदंगास्त त्रयाधुसाधितापरजयन् ३२ ऊचुश्चेदंकथंतातसर्वदुःखोपमा
र्जनं पद्मासनंजगत्सृष्टंचिरंचित्वमवा प्नुमः ३३ भ्रातृज्ञातेनपुनः प्रोक्ताभ्रातरोभूरितेजसः मदुक्तंसर्वएवमे
भवतः पालयंतुवै ३४ पद्मासनगतोभ्रात्वानुब्रह्माहमितितेजसा सृजामिसंहरामीतिध्यानमस्तुचिरावयः ३५
अनजेनेतिकथितेवाढंकृत्वातउत्तमाः ध्यानाशक्तधियत्तस्थुः सहैवप्रायसारसात् ३६ लिपिकर्मार्पिता
कारा ध्यानार्शक्तधियस्ततेऽनंतस्थैनैवमनसाचिंतयामासुराहताः ३७ अथउत्फुल्लकमलकोशवक्त्रोत्नता
सनः ब्रह्माहंजगतोस्रष्टाकर्ताभोक्तामहेश्वरः यज्ञक्रियामेवतः सोंगोपांगामहर्षयः सरस्वत्यापगापत्याय
कविदानरादूमे ३९ लोकपालपराक्रांतः संचरन्सिद्धमंडलः अप्रमद्धामसौभाग्यः स्वर्गत्वरविभूषितः ४०
पर्वतद्वीपजलधिकाननैः समलंकृतं इदंभूमंडलंचैव त्रिलोकीकर्णकुंडलं ४१ एतत्पालकुहरदैत्य

वक्ष्यमाणप्रकारक्रमः सर्वेष्विपदिक्षेबोध्यः चिरायेति भ्रमरकीटन्यायेन आतद्भावोदयमित्यर्थः ३५ वाढंकृत्वाहठमेगीकृत्य
न्यापसाजेषश्चात्रा सहैव रसात्फलरागातिशयात् ३६ लिपिकर्मश्चित्रलेखस्तदर्पिताकाराः ३७ तत्कृतचिंतनप्रकारंवक्तुम

२४३

२५६

गीर्वाणादेवास्तत्सदृशौ तौ दंपती अथ वामाधिकदिव्यशरीरकल्पना गीर्वाणसदृशो उमामहेश्वरौ खंबालवंबुलोकाशसिन १८ मुग्धा
संदरान् २० कृतजातनामकर्मकरणान्नप्राशनचौलोपनयनवेदव्रताध्ययनादयो ब्राह्मणसंस्कारा येषां प्रारुषावर्षैर्नृना २१ स्वां
गतिं विदेहकैवल्यं यतो मुख्यं तत्र मगतिं गतब्रह्मकोविदो २३ खेदिनो दुःखिताः २४ तेषां भाग्यवशाद्धा विहेरणपगर्भस्थिर्पे प्राप्यन्
सारीविचार उत्पन्न इत्याह तत्रेति विबांधवाः पित्रादिबंधुहीनाः परं विभवोत्कर्षश्रेयः सुखं इति संचिंतं संइदंतनसमाणभ्योतु २५
एहिकामुष्मिकसख्योपायतया स्वीकर्तुं समुचितं हे भ्रातरः रोहिकसुखहेतुलोपि परिणामे प्रदुःखदं किं २६ एवं सामान्यतो विमृश्य

ततस्तौ दंपती तुष्टौ शिवलब्धवरौ गृहं गतौ गीर्वाणसदृशौ खमिवामामहेश्वरौ १८ तत्रासौ ब्राह्मणी गेहे बभूवोदा
रगर्भिणी नभोऽपूर्णे दशपामासे बालेखेचवाविणा १९ कालेयसुषुवेऽजानू प्रतिपच्चंद्रकोमलान् दशबालांस्त
तोमुग्धान्वसुधेवनवांकुरान् २० कृतब्राह्मणसंस्कारावर्द्धिषुर्महौजसः स्वल्पेनैव हि कालेन प्रवृद्धा इव नवांकु
राः २१ तेसप्तवर्षवयसो बभूवुर्नितवाङ्मयाः विरेजुस्तेजरात्तजनमसीवामलाग्रहाः २२ अथ कालेन महता ते
षां तौ पितरौ तदा संजग्मतुस्तनुं त्यक्त्वा स्वां गतिं गतिकोविदौ २३ मातापितृभ्यां रहिता दशते ब्राह्मणास्ततः ययुः के
लाशशिखरं गृहं संत्यज्य वैदिनः २४ तत्रते चिंतयामासुरुद्विग्नास्ते विबांधवाः किं स्यादिह परं श्रेयः उच्चैश्रेदं परस्प
रं २५ किमिहस्यात्समुचितं भ्रातरः किमदुःखदं किं महत्वं किमैश्वर्यं किं महाविभवं शुभं २६ किं तदेतज्जनैश्वर्यप्रसि
द्धं तौ हि महेश्वरः सामंतसंपत्किंनामराजानो हि महेश्वराः कानामसंपद्रूपानां सम्राडिहमहेश्वरः २८ किंनामत
न्महेंद्रत्वं यन्मुहूर्त्ते प्रजायते द्विनरूपते तत्कल्पे किं स्यात इह शोभनं २९ भाषमाणेष्वेतेषु श्रेष्ठो भ्रातामहामतिः

विशेषतोपि विमृश्यंति किं इति तदेतज्जनानामैश्वर्यं किं उत्कर्षं ग्रहण्यमाधिपतिभ्यः हियस्मात्सामंतो मंडलाधिपतिर्महानीश्वरः
ऐश्वर्यवान् किं नाम किं पतनाम राजानो देशाधिपतयः २७ महेंद्रस्तु हि महेश्वरः स्यात्तत्राह किं नामेति २९ एवं भाषमाणेषु भ्रातृषु

१ २ जन्तवो भक्षकः क्रव्यादा मांसाशिनो मृगपक्षिणः ३ शरीरनाशेऽपि तेषामात्मनि तिकी वा हार्थप्रलय निरत्तिः संपन्नेत्याह अथेति चतुर्युगस्यायुषो क्षयांते ४ ते ऐंदवास्तथैव त्वमन: कल्पितब्रह्मांडसर्गादिप्राप्ततथैव व्यवस्थिता: ५६ रात्रेः क्रमेणं क्रमेऽतिक्र मस्तत्परे स्वप्सरीरे त्वपि योगनिद्रया आत्मनि स्थिते सति ७ एतावतायं चेन कथमिदं ज्ञातमिति प्रश्ने यस्माहते षामित्यादिना ते षामैंदवसर्गाणां मध्ये एकतमस्य ब्रह्मांडस्य छिद्रभूताकाशलक्षणे मंदिरे भुवांति त्रैलोक्योपलक्षणं भूलोके एव कर्मगतया कालविभागज्ञानस्य विशेषोपयोगात् १० एतसर्गभ्रिन्त्वत्वे पितवसर्गेकोपि विरोध इत्याशयेनाह यथेच्छसीति ११ कृतेन विरो धइत्ति चेन्म

यावते देह कास्तेषां तापेन पवनेन स्तथा कालेन शोषमभ्येत्य गलिता: शीर्णपर्णवत् २ जन्तवस्ते देहकांतज क्रव्याद वनवासिन: इतीमस्तेतस्थलु छिता सफलानीव सकेरा ३ अन्ते शांतवाह्यार्थो ब्रह्मत्वंकृतभावना: तस्युश्चतुर्युग स्यांते यावत्कल्पक्षयं गत: ४ क्षीयमाणे तत: कल्पे तपत्यादित्य संचये पुष्करावर्तके पूर्वैवर्षत्सु कठिनोऽव ५ वहत्सु कल्पवातेषु स्थितरा [illegible] कमहार्णवे क्षीणेषु भूतवृंदेषु तेऽप्येवं व्यवस्थिता: ६ ततो रात्रिक्रमपरेस र्वे संहत्य तां स्थितिं स्थिते त्वय्यात्मनि विभो तत्तथैव व्यवस्थिता: ७ अथ प्रबुद्धे भवति सृष्टुमिच्छति संस्रतिं सर्वे नैव क्रमेणोत्त्वेते तथैव व्यवस्थिता: ८ तथैते भगवन्ब्रह्मा ब्रह्मणो ब्राह्मणा दश तएते दश संसारा मनोव्योमनि संस्थि ता: ९ तेषामेकतमस्या हमयमाकाशमंदिरे भानुर्भुवि विभो कालकला कर्मलियोदित: १० एवमेते कल्पित: सर्गदशा नामअसंभव ब्रह्मणां संभवो व्योम्नि यथेच्छसि तथा कुरु ११ विविध कल्पनयावलितांवरं यदिदमुत्तम जागत मुत्थि तं करणजालकमाहितमोहनं तदखिलं निजचेतसि विभ्रम: १२ ॥ मोक्षोपाये जगद्दर्शननाम सर्ग: ८९ श्रीब्र ह्मोवाच ॥ ब्राह्मणो ब्राह्मणो भानुरित्युक्तो ब्राह्मणोऽमम ब्रह्मन्ब्रह्मविदांश्रेष्ठ तत्स्वीमेव वदभवस: १ ॥ ॥

न: कल्पनामात्रत्वे नासत्वादित्याशयेनाह विविधेति हेउत्तमकरणानां बाह्याभ्यंतराणां जालकमिव बंधकसूतं आहितेन आसं गेन मोहनं यदिदं जागतं दृश्य जातमुत्थितं तदखिलं तेषां निजचेतसि स्वचित्ते विभ्रमो भ्रांतिमात्रं न वस्तु सदित्यर्थ: १२ इति श्रीवाशिष्ठ तात्पर्यप्रकाशे उत्पत्तिप्रकरणे सप्ताशीतितम: सर्ग: ८९ इह धातुरनासत्त्वासर्गसिद्धिरुदीर्यते मनसाकल्पितस्तथा न्येरतिवर्त ।

अयंमरंतस्य प्रजानांअलंकृतंअलंकारंशोभमानतांददातीतिप्रज्ञालंकृतरः राजानः राजभिर्हिप्रजाःशोभंतेतेपूत्तमः ४३ दी
प्रा मिः कांतिः जालस्तएवरञ्जाभिः पाशैर्दिशागामवष्टम्भयथानपलायंतेतथावधारसादानायप्रतयंतिभानवोद्वादशादित्याः
भूरिभानवः प्रचुरकिरणाः क्रमेणचैत्रादिमासक्रमेण ४४ अग्रच्छाभिः याः त्वान्महतीभिः ४५ उन्मज्जंत्याविर्भवंतिनिमज्जं
तितिरोभवंप्रस्फुरंतिविविधविभवादिनांविराजंतेदारिद्र्यदोषादिनापतंतिच ४६ आत्मनिपारमार्थिकेस्वरूपेतिष्ठभिःअ

अयमिंद्रोमहाबाहुः प्रज्ञालंकृतदोत्तमः त्रैलोक्यनगरीमेकयातिपावनयज्ञभुक् ४३ दीप्रज्ञालनरञ्जाभिर
वष्टभ्यापदिग्गणं क्रमेणप्रतपंत्येतेभानवोभूरिभानवः ४४ लोकपालाइमेलोकंरक्षंतिप्रजरत्नयः मर्यादा
मिरतुलाभिर्गोपालागोगणंयथा ४५ उन्मज्जंतिनिमज्जंतिप्रस्फुरंतिपतंतिच तरंगाइवतोयानामिमाः प्रतिदि
नंप्रज्ञाः ४६ सज्जामीममहंसर्गसिंहारामितयाद्दतः अयमात्मनितिष्ठभिशाम्यामिभुवनेश्वरः ४७ अयंसंवत्स
रोपातइदंपरिणतंयुगं सृष्टेरयमसौकालः स्वयंसंहरणस्यच ४८ अयमेवगतः कल्पोब्राह्मीरात्रीरियंतता॥
५ अमात्मनितिष्ठामिपूर्णोलापरमेश्वरः ४९ इतिभावतयावुद्धातेद्विजा अथरैद्वाः दशादिप्रतयस्तस्यु ः
सम्मीलीगाइवोपलात् ५० अधिगतकमलासनक्रमास्तेपदिगलितेतरतद्व्रतिजालाः सततमतितरांकुशा
सनस्थाश्चिरमितिपंकजकल्पनेविरेजुः ५१ इतिश्रीवाशिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेमोक्षोपायेरैं
दवसमाधानंषडशीतितमः सर्गः ८६ भानुरुवाच॥ पितामहक्रमेतस्मिंस्ततत्त्वेबहुभावनात् कर्मभिस्ते:
समाक्रांतामनस्कास्तस्थुराहताः १
तएवशाम्यस्मिपरमे ४७ उक्तमेवस्पष्टंत्वेदद्वपसंहति अयमित्यादिद्वाभ्यां ४८ अथरैंदवाइत्यसंधिः संहिताऽनित्यत्वात्
अधिवृत्तयोदृढवज्रासनाः ५० कुशासनस्थास्तेपंकजासनकल्पनेसतिपरिगलितेतरवृक्षतिजालाः संतः अधिगतकम
लासनक्रमाश्चसंतः विरेजुः ५१॥ इतिश्रीवाशिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेषडशीतितमः सर्गः ८६ मनसाब्रह्मरू
तानांजन्मादेर्देहमहत्त्वे सर्गचप्रतिसर्गचतथावस्थितिरियंतेहपितामहतेरैंदवाः तस्मिन्नुपालिक्रमेतैस्तैर्भुवनमृतया

ना: शोषमभ्येत्यगलिताइतिपरेणान्वयः १

माद्दिसृष्टिपरिपालनसंहारादिकर्मभिस्त्वभिवसमाक्रांतमन
स्कास्तेचैवाहताः अत्यासक्ताः सततंतावत्तस्थुर्यावत्तेषांकृशादेहादेह

आ०टी०
उ०प्र०
२४८

नहैंदैवकृतस्सर्ग एवमायाचन्दनादृष्टमप्यत्राहयेवेति २६ यद्येवं तर्हि फलमनसाद्दशेपायमेवं सर्गमित्यतिकूलएवेतिमयानाश
नीयस्तत्राहनन्वेतानिति दशैतान्ससारांस्तद्द्वेतून्दशनीरजसंभवान्मग्नान्वाकश्चिन्नाशयितुंशक्तः २७ शोद्धुंराधयितुमित्यन
योर्नाशयितुमित्यर्थः २८ वद्धूपदतांरूढमूलतां २९ शापेनतर्हिसमया निरसनीयस्तत्राहंबहुकालेति २० बद्धूपीठंस्थिरीभूते॥
अतएवदृढमूढानांसंसारमिवारण्येतद्बोधनमेवोपायोनशापादिरित्याह तद्बोधनादितिशैलोघानांशिलाशकलसमूहा

येनैवमनसासर्गोनिर्मितःपरमेश्वरः सएवमांसनेनेरातंपश्यतिहिनेतरः २६ नचैतान्दशसंसारान्दशनीरजसंभवान्
कश्चिन्नाशयितुंशक्तश्चिन्मदासौचिरस्थितान् २७ कर्मेंद्रियैर्यत्कियतेतद्वोद्धुंकिलयुज्यते नमनोनिश्चयकृतंकश्चिद्रोध
यितुंक्षमः २८योबद्धूपदलोयातोजंतोर्मनसिनिश्चयः सतेनैवविनाब्रह्मन्नान्येनविनिवार्यते २९ बहुकालंपरम्परास्तंमन
साद्दढनिश्चयं शापेनापिनतस्यास्तिक्षयोनष्टेपिदेहके २० यद्बद्धूपीठमभितोमेनेसिप्रहृष्टंतद्रूपमेवपुरुषोभवतीहना
नात् तद्बोधनादृतेरदत्रकिलाभ्युपायंशैलौघशकलमिवनिष्फलमेवमन्ये॥२१॥ इतिश्रीवाशिष्ठमहारामायणेउत्पत्तिप्रकरणे
ऐंदवनिश्चयकथनेनामाष्टाशीतितमःसर्गः ८८ ऐंदवोपाख्यानेसंपूर्णे॥भगवानुवाच॥मनोहिजगतांकर्तृमनोहि

२४९ पुरुषःपरः मनःकृतंकृतंलोकेनशरीरकृतंकृतं १ सामान्यब्राह्मणाभूत्वामनोभावनयाकिलैपश्यपशक्तता २ मनसाभा
वमानोहिदेहतांयातिदेहकः देहभावनयायुक्तोदेहधर्मैर्निबाध्यते ३ बाह्यदृष्टिहिनियतंसुखदुःखादिविंदतिनांतर्मुखतं
७२ पायोगीदेवेतिप्रियाप्रिये ४ मनःकारणकंतस्माज्जगद्विविधविभ्रमं इंद्रस्याहल्ययासाद्धुरतान्तात्रभिदर्शने ५ ब्रह्मोवाच
काहल्याभगवन्भानोकोवात्रेंद्रोत्तमोनुद पयोरुदंतश्रवणीयाबितीद्दृष्टिरेतेहि ६ ॥ राम ॥ ॥ ॥

नौघंकुरादयेद्धयासेकमिवनिष्फलमेवाहंमन्ये २१॥इतिश्रीवाशिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेअष्टाशीतितमःसर्गः ८८॥
मनसोबद्धूपीठस्थपरत्वतेस्वाल्पता इंद्राहल्यामनोरत्निकथयात्रप्रकाश्यते समष्टिभावायत्तंमनएवपरःपुरुषोहिरण्यगर्भः १२
दिहभावनयाऽयुक्तइतिद्विदःसुक्तइतिपाठःस्पष्टः धर्मैर्जन्ममरणादिभिः ३ बाह्येदृष्टिर्देहादावात्मीयदृष्टिर्यस्यसः ५ वक्ष्यमाण

ब्रह्मत्वमभिधानात्
मनसो ४

२४८

अयंमरंतस्य प्रजानांअलंकृतंअलंकारंशोभमानतांददातीतिप्रजालंकृतद्राः राजानः राजभिर्हिप्रजाः शोभंतेतेपूत्तमः ४३ दी
प्राप्तिः कांतिः जालसूत्राणिरश्मिभिः पाशैर्दिशामवष्टम्भयत्नानपलायंतेतथावधारणादानायप्रतपंतिभानवोद्वादशादित्याः
भूरिभानवः प्रचुरकिरणाः क्रमेणचैत्रादिमासक्रमेण ४४ अच्छाभिः सः त्वान्महतीभिः ४५ उन्मज्जंत्याविर्भवंतिनिमज्जंति
तिरोभवंप्रस्फुरंतिविविधविभवादिनांविराजंतेदारिद्र्यदोषादिनापतंतिच ४६ आत्मनिपारमार्थिकेस्वरूपेतिष्ठभिः

अयमिंद्रोमहाबाहुः प्रजालंकृतदोत्तमः त्रैलोक्यनगरीमेकयातिपावनयज्ञभुक् ४३ दीप्रजालवरत्नाभिर
वष्टभ्यापदिग्गणां क्रमेणप्रतपंत्येतेभानवोभूरिभानवः ४४ लोकपालाइमेलोकंरक्षंतिशुद्धरत्नयः मर्यादा
भिरतुलाभिर्गोपालागोगणांयथा ४५ उन्मज्जंतिनिमज्जंतिप्रस्फुरंतिपतंतिच तरंगाइवतोयानानिमाः प्रतिदि
नंप्रजाः ४६ सज्जनास्त्रीसमहंसर्गसिंहानामितयादृतः अयमात्मनितिष्ठामिशाम्याभिर्भुवनेश्वरः ४७ अयंसंवत्स
रोयातइदंपरिणतंयुगं सृष्टेरयमसौकालः स्वयंसंहरणस्यच ४८ अयमेवगतः कल्पोब्राह्मीरात्रिरियंतता॥
५ अंमात्मनितिष्ठामिपूर्णात्मापरमेश्वरः ४९ इतिभावतयाबुद्धातेद्विजा अथपरेदेवाः दशाद्विष्टतयस्तस्युः
समुत्कीर्णाइवोपलात् ५० अधिगतकमलासनक्रमास्तेपद्मदलैततरतद्धृतिजालाः सततमतितरांकुशा
सनस्थाश्चिरमितिपंकजकल्पनेविरेजुः ५१ इतिश्रीवाशिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेमोक्षोपायेऐं
दवसमाधानंषडशीतितमः सर्गः ८६ भानुरुवाच॥ पितामहक्रमेतस्मिंस्तत्तत्वहुभावनात् कर्मभिस्तैः
समाक्रांतामनस्कास्तत्पुराद्भुताः १
तएवशाम्यत्सुपरमे ४७ उक्तमेवस्पष्टंदेहस्तुपसंहृतिः अयमित्यादिद्वाभ्यां ४८ अथपरेदेवाइत्यसंधिः संहिताऽनित्यत्वात्
अद्विततयोद्दवज्ञासनाः ५० कुशासनस्थास्तेयंकजासनकल्पनेसतिपद्मदलितेततरतुद्धृतिजालाः संतः अधिगतकम
लासनक्रमाअसंतः विरेजुः ५१॥ इतिश्रीवाशिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेषडशीतितमः सर्गः ८६ मनसाब्रह्मभ
तानांजन्यादेदेहभक्षणे सर्गंचप्रतिसर्गंचतथावस्थितिरीयंतेहेपितामहतेऐंदवाः तस्मिन्नपात्तिक्रमेतैस्तेभुवनभूतया

नहेंद्रियकृतस्सर्ग एवमायाचत्तथाद्दृष्टमप्रत्याहप्येवेति १६ यथैवं तर्हि रूपमेन्मनसा दृश्यायमेंरवसर्गोमित्यत्रनिकूलएवेतिमयानाश
नीयस्तत्राहन्चेतानिति दशैतान्ससारांस्तहेतून्दशनीरजसंभवान्मग्नजान्वाकश्चिन्नाशयितुंशक्तः १७ शेद्धुंराधयितुमितमन
योर्नाशयितुमित्यर्थः १८ वद्रूपदतांरूढमूलतां १९ सोयेनतर्हिसमया निरसनीयस्तत्राहंबहुकालेति २० वद्रूपीठंस्थिरीभूते॥
अतएवदृढमूढानांसंसारमिवारणेतद्बोधनमेवोपायोनपरस्शापादिरन्यइत्याह तद्बोधनादितिशैलौघानांशिलाशकलसमूहा

येनैवमनसासर्गोनिर्मितः परमेश्वरः सएवमांसनेत्रेणतंपश्यतिहिनेतरः १६ नचैतान्दशसंसारान्दशनीरजसंभवान्
कश्चिन्नाशयितुंशक्तश्चिरप्रदार्ढ्याच्चिरस्थितान् १७ कर्मेंद्रिवैर्यकिंयेतेतद्धंडुकिलयुज्यते नमनोनिश्चयकृतंकश्चिद्रोध
यितुंक्षमः १८यो बद्रूपदतांयातोजंतोर्मनसिनिश्चयः सतेनैवविनाबुद्धन्नान्येनविनिवार्यते १९ बहुकालंयदभ्यस्तंमन
साद्दृढनिश्चयं शापेनापिनतस्याक्षिसर्योनश्येदिहकेवल २० यद्वद्रूपीठमस्मितो मेनेसिप्ररूढंतद्रूपमेवपुरुषोभवतीहना
न्यत् तद्बोधनादितरदत्रकिलाभ्युपायंशैलौघशकमिवनिष्फलमेवमन्ये॥२१॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणे
ऐंदवनिश्चयकथनंनामाष्टाशीतितमःसर्गः ८८ ऐंदवोपाख्यानंसंपूर्णं॥भगवानुवाच॥मनोहिजगतांकर्तृमनोहि
पुरुषःपरः मनःकृतंकृतंलोकेनशरीरकृतंकृतं १ सामान्यब्राह्मणाभूत्वामनोभावनयाकिलैपश्यपशक्तौ २ मनसाभा
वमानोहिदेहतांयातिदेहकः देहभावनयायुक्तोदेहधर्मैर्नबाध्यते ३ बाह्यदृष्टिर्हिनियतंसुखदुःखादिविंदति नांतर्मुखत
यायोगीदेवेतिप्रियाप्रिये ४ मनःकारणकंतस्माज्जगद्विविधविभ्रमे ईंद्रस्याहल्ययासार्द्धं वृत्तान्तोत्रनिदर्शने ५ ब्रह्मोवाच
काहल्याभगवन्भानोकोवात्रेंद्रस्तमोनुद पयोरुदंतश्रवणेयाबतीदृष्टिरेतिहि ६ ॥ राम ॥ ॥ ॥

245

नांश्रंकुरादयेद्वद्यासेकमिवनिष्फलमेवाहंमन्ये २१॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेअष्टाशीतितमःसर्गः ८८॥
मनसोवद्रूपीठस्यापरयत्नेस्वाल्पताइंद्राहल्यामनोवृत्तिकथयात्रप्रकाश्यते समष्टिभावायत्तंमनएवपरःपुरुषोहिरण्यगर्भः १२
मनसोवद्रूपीठस्थापरयत्नेस्वाल्पता ईंद्राहल्यामनोवृत्तिकथयात्रप्रकाश्यते २ ब्राह्मेदृष्टिर्देहादावात्मतामीयदृष्टियेस्पसः ४ वक्ष्यमाण
दिहभावनयाऽयुक्तइतिछेदः मुक्तइतिपाठःस्पष्टः धर्मैर्जन्ममरणादिभिः ३ ब्राह्मेदृष्टिर्देहादावात्मतामीयदृष्टियेस्पसः ४ वक्ष्यमाण

ब्रह्मत्वमपिपातालै
मनसो ४

भानोभानो इत्याहयत् द्विरुक्तिः २ कोर्थः किंप्रयोजनं ३ युक्तंमयप्रष्टोचितं ४५ अर्कादिजलादिलात्मकं प्रतिबिंबमिव अधियः निर्मन
स्कात् ६ सर्गनिष्कामतां कैमुतिकन्यायेन द्रढयति शरीरेति शरीरात्मकस्यावयवसन्निवेशस्यत्यागेरागे अहमभिमानेनस्वी
कारेरंजनेचतेभावोनिष्कामः ७ दिनंदिनंप्रतिर्यथासृजति तथासृजति ८ कर्तव्यंसर्गाहंदृप्यमः स्वाच्याभिलषणोचोगस्त्वं दिदृक्षात्
न ९ आत्मनःत्वस्यनित्यकर्मपरित्यागात्परमन्यदपूर्वमदृष्टंकलिमवाप्स्यसिनकिंचिदित्यर्थः १० तर्हि किंमुपरमोयुक्तः नेत्याह ५

ननूक्तंमयातस्यचिरंसंचिंत्यचेतसा भानो भानो वदायुक्तं किमन्यत्संसृजाम्यहं २ एतान्निदशविघंतेकिलयञ्जगं
तिवे तत्रान्योममसर्गेणकोर्थःकथयभास्कर ३ इत्युक्तोथमयाभानुः संचिंत्यसुचिरंधिया इदमत्रवचोयुक्तं एवा ४
चसमहामुने ५ भानुरुवाच। निरीहस्यनिरीहस्यकोर्थः सर्गेणतेप्रभो विनोदमात्रमेवेदंसृष्टिस्तवजगत्पते ५
निष्कामादेवभवतःसर्गः संपद्यतेप्रभो अर्कादिवजलादिसप्रतिबिंबमिवाधियः ६ शरीरसन्निवेशस्यत्यागेरागेच
तेयदा निष्कामोभगवन्भावोनाभिवांछतिनास्तिति ७ सृजसीदंतथादेवविनोदायैवकृतय पुनःसंप्रलयसंहत्यदिनंदि ८
नप्रतिर्पया ८ तवनित्यमसंसक्तंविनोदाय्यैवकेवलं इदंकर्तव्यमेवेतिजगन्न्तुधमेद्व्या ९ सष्टिंचेन्नकरोषित्वंमहेश
परमात्मनः नित्यकर्मपरित्यागात्किमपूर्वमवाप्स्यसि १० यथाप्राप्तंहिकर्तव्यमसक्तेनसदासता मुकुरेणाकलंकेनप्र
तिबिंबक्रियायथा ११ यथैवकर्मकरणेकामनानास्तिधीमता तथैवकर्मसंत्यागेकामनानास्तिधीमतां १२ अतःसुष
प्तोपमयाधियानिष्कामयातया सुषुप्तवदुपस्मयाकुरुकार्यंयथागतं १३ सर्गेरिपंदुपुत्रोतोविजगत्प्रभोतदे नेतोष १४
यिष्यंति तंत्वांसर्गात्सुरेश्वर १५ चिंतनेनैवभवानेतानसर्गांन्या [illegible] स्यनोदृशा अवशंपंचवुधासर्गेति

यथाप्राप्तमिति ११ अप्राप्तकरणेइवप्राप्तंत्यागेऽपिहेत्वभावादित्यर्थः १२ परमार्थतोऽकरणात्सुषुप्तोपमयाप्रतीतःकरणानुसुषुप्तवद्वुः
त्वभस्तसमया १३ किंचैतेरैंदवसर्गस्त्वंसपुत्रपित्रादिनांसंपद्दुडुर्दृशिनाद्विपदितोषमेवितंहि एतेऐंदवाअप्रेऽपिसर्गानंतोषशीलं
त्वांतोषयिष्यंतीत्यर्थः १४ अतएवतोषदत्तयापिमत्सर्गात्तेनकृतानगतार्थैत्सवाहचिंतनेनैवेणांतिभवानन्यस्यसर्गेचिंतरूपेणनेत्रेणप

एा२
तोसि२

वा०टी० तदेवस्पष्टमाह ईंद्रमिति २३ अतिशयेन निरंतरेण च स्नेहेन निरावरणाः अप्रच्छन्ना अवृष्यापयोस्तयोः कदीदुः सहावपाप
उ०प्र० स्मात्सः २५ शासनपीडनं २६ तदेवविशिष्यदर्शयति तानीत्यादिना तत्र लौकिके सत्ते कल्पिते पि विषये चित स्थैर्ययरानद्दः खं
२४९ सुखसंपन्नि आश्रितदापरमात्म नितत्स्थैर्यंतत्प्रसक्ति संभवनापि दूरं निरस्ता निरतिशयानंदावाग्निस्त्रत्वत- सिद्धेतितात्पर्यं रह
संसूचयंस्तयो चित स्थैर्यफलद्वयं प्रपंचयति नु बावित्यादिना २७ आत्मानं खदेहं रूपभावमिति क्रियाविशेषणं २९ यद्यस्माद

ईंद्रध्यापति सापावन्नावतस्पाविराजते सुखंपूर्णेनचंद्रेण प्रबुद्धमिव केरवं २३ ईंद्रोपि चतदासक्तः समस्तकर
णाकुलः नतिष्ठ तिक्षणमहोतयाविरहितः क्वचित् २५ अथातिसघनस्नेहनिरावरणचेष्टयोः तयोरनपक्ता
नोराज्ञा कर्णिकिदुर्नीय: २५ एवमनन्योन्यमासक्तेभावमालस्यभूपतिः चकार बहुभिर्दृष्टैसद्यो रपशासनं २६ ता
वुभावपिसंत्यक्तौहेमंतेशालिलाशये उषितौजहसतुस्तत्रनखेदं समुपागतौ २७ अथद्धततो राज्ञा खिन्नौ स्थानतु
मंतौ नास्तनुमहीपालंजलाशयसमुद्भूतौ २८ संस्मृत्यावामिहान्योन्य मुखरक्तौ तिमनिंदितौ आत्मानं नविजानीवो
रूपभावंपरस्परं २९ शासनेषु चयसंगोनि: शंकस्तेन हर्षितौ सुष्यावोनमहीपालस्त्वांगेरपिविकृतितैः ३० ततो
भार्गं परिस्क्षिप्तावखिन्नावेवमेवतौ ऊचतुः सुस्थितालाभावन्योन्यस्मृतिहर्षितौ ३१ सुस्थितौजंगपादेषु नखिन्नावेवसं
स्थितौ एवमेवौ चतुर्भूयमन्योन्यस्मृतिहर्षितौ ३२ कशाहतावखिन्नौ तावेवमेवकिलोचतः अन्यस्मात्कुशासना
द्राज्ञा कल्पितात्पुनःपुनः ३३ उद्धृतावूचतुः एषो तमेवार्थं पुनःपुनः उवाचेंद्रमहीपालं ज्ञान्मेदयितामयुः ३४
अन्यस्मात्कुशासनाद्राज्ञा कल्पितात्पुनःपुनः असपाश्वेवजगद्राजन्सर्वमिन्मयमेवच ३५ तेनान्यशासनादुःखं किंचिदेवन
विद्यते मनोमित्रमहेराजन्मनो हि पुरुषः स्मृतः ३६ प्रपंचमात्रवेवापदेहोद्धयतएवहि समकालप्रयुक्तेनसहसादंडराशिना
वयोःसंगोमनः संवोधोनिः शंकः भेदशाकाश्यन्यत्तेन हेतुनात्वत्कृतेषु शासनेषु पीडनेषु हर्षितौ स्वः नमुह्यावश्च ३० एवं पूर्वोक्तरीत्यैवो
चतुः ३१ ३२ ३३ ३४ दुःखोनिदुःखेहेतत्त्वपि शरीरशातनानिकिंचिन्नबाधंतएवेतियोजना ३५ अन्यशासनात् अन्यस्मात्पीडनादपि नैव विद्यते आवयोरिति शेषः ३६ प्रपंचः कल्पितो विस्तारः मनस एवे त्यर्थः मनएव हितर्हि दंडभेत्स्यामितत्राह समकालेतिसमशब्दः एकपरः

246

२७

अपरः पुराणांतर प्रसिद्धः इंद्रद्युम्नइव ७ पिंगो विटः पिङ्ग इति पाठे पिसल्वार्थः धीमान्वि ८ विद्याकुशलः ६ अहल्या गौतम
पत्नी १० स इंद्रः सक्तः आसक्तः सन कुतो नो रात्रिनागच्छतीत्युत्सुका उत्कंठिता ११ निदाघेन ग्रीष्मेण तप्ता सुस्थली भुपरिलो
लासत्सी वसूर्यति स्वागस्समत्या नांघउपधाया इतिपलोपः २३ तया लज्जापि सत्का अनुपातया अनुरक्तया २४ अथानंतरं

[illegible]

भानुरुवाच ॥ श्रूयते स्मियादेव मागधेषु महीपतिः इंद्रद्युम्न इतिख्यातः इंद्रद्युम्न इवापरः ७ तस्येंद्र बिंबप्रति
मा भार्या कमललोचना अहल्या नाम तत्रासीद्रूपशोभासमन्विता ८ तस्मिन्नेव पुरे पिंगः पिंगप्रकरशेखर
रः इंद्रनामापरः कश्चिद्धीमान्विप्रकुमारकः ६ अहल्यापूर्णमिंद्रस्य बभूवेष्टसहल्यया श्रुतं राजमहिष्याकं
कण्यकथाप्रस्तावतः क्वचित् १० आकर्ण्यैव महल्यासा बभूवेंद्रानुरागिणी अहल्यामास नो कस्मात्स कोमे
नीत्यथोत्सुका ११ मृणालभारकदलीपल्लवास्तरणेषु सा अतप्यत भृशं बाला लता लु नावनेष्विव १२
स्थस्थापसमग्रा सुतासु भूपति भूतिषु भेत्सी निदाघतप्तो सुपरिलोलास्थली ष्विव १३ अथमिंद्रोयमिंद्र अत्य
पृष ७ वं जातप्रलापया लज्जापि हित्वा तया त्यक्तौ वेवरुप महतातया १४ इत्या तेयाघनस्नेहमथा तस्यावयस्यया उक्तं त
या प्रियेति ध्वमिंद्र मभ्यानयाम्यहं १५ इत्थं तवानयामीति श्रुत्वा विकसितेक्षणा पपात पादयोः सख्यानलिन्या
नलिनी पया १६ ततः प्रयाते दिवसे समायाते निशागमे सखी बसात मिंद्राख्यं ययौ द्विजकुमारकं १७ वो घयि
त्वा यथायुक्तं सात मिंद्रमयांगना अहल्या निकटं शश्वानयामास सत्वरं १८ ततः सा तेन पिंगेन सहेंद्रेण रतिं
ययौ कस्मिंश्चित्सदने गुप्ते बहुमाल्यविलेपना १६ हारांगदमनोज्ञेन तत्र सा तेन सा तदा रतेनावर्जिता बल्लीरसे
न मधुनायथा २० ततस्तदनुरक्ता सा पश्यंती तन्मयं जगत् न समस्तगुणं कीर्णमेनो रेखहुमन्यत २१ केन चित्त
य कालेन तस्याः इंद्रानुरागिता साज्ञाता राजसिंहेन तन्मुखलक्षमचंद्रिका २२ ॥ ॥

तस्य याश्वं विधां दृष्ट्वा ... नेया नया इति उक्तं हे प्रियेसखि अहं इंद्रं अभिमुखं अविघ्नं यथास्यात्तथानयामि १५ नलि
नी पद्मिनी ग्लाना अन्यस्याः नलिन्याः श्लेषयथा पतति तिद्वत् १६ १७ १८ १६ रतेन सुरतो चितक्रीडनेन आवर्जिता वशीकृ

...मधुनावसेन २० २१ तत्कुरवर्यो ... प्रकाश... श्लोक २२

वा०टी० उक्तमेवार्थं दृष्टांते ग्रोपादुपन्नाहमुख्यांकुरमिति ५२ अत एव देहनाशेपि पुनः पुनर्देहोद्भव चित्तनाशे तु कैवल्यमेव न
उ०प्र० पुनर्भवइतिप्रसिद्धमित्याह देहेइति ततश्चितत्वक्षणं रत्नं सर्वार्थ हेतुभूतं चिंतामणिं समनुपालय परमपुरुषार्थसमाधाने ।
२५० नरस्य नतुच्छक्रोधादिवशतया विनाशयेइत्यर्थः ५३ उक्तार्थं पिंडी कृत्यान् घोपसंहरन्देहेनप्रयत्नवैफल्यमाह दिशि दिशी
तितवपुरस्यतदंतर्गतप्रकृतीनांसेवकादिप्रजानांनामधेयमप्यसदुःखदायिकस्मात् सत्त्वपातादियच्च तत्फलंदुःखंततः किं

मुख्यांकुरंसुभग विद्धिमनो हि पुंसो देहः सतः प्रविसृतास्तु रूपपल्लवाभाः नष्टे कुरे पुनरुदेति न पल्लवश्रीर्नैवांकु-
रस्यमुपैति दलक्षयेषु ५२ देहे सतेपि विविधदेहगणं करोति स्वभावना किंचनवं नवमाशु चेतः चिते क्षते तु न करोति हि
किंचिदेव देहस्ततः समनुपालय चित्तरत्नं ५३ दिशि दिशि हरिणाक्षीमेव पश्यामि राजन्प्रियपशुचरति मनस्त्वाज्ञत्पमा
नंदितोस्मि तवपुरप्रकृतीनां यत्फलं दुःखदायि क्षणमपि सुचिरं तन्न पश्यामि किंचित् ५५ ॥सौत्रोपायेषूत्पत्ति
प्रकरणे क्रचिमेंद्रवाक्यं नवाशीतितमः सर्गः ८९ भानुरुवाच॥ एवं द्रोणवमुक्तोसौ राजाराजीवलोचनः सु-
247 निं भरतनामानं पार्श्वसंस्थमुवाच ह ॥१॥ राजोवाच॥ भगवन्सर्वधर्मज्ञ पश्यामि सुदुरात्मनः भ्रष्टामस्य मुखेस्फा-
रं धाष्टर्यमिद्धरहारिणः २ पापानुरूपमस्याशु शापं देहि महामुने यदवध्य वधं तापं च
कृत्यागात्तदेव हि ३ इत्युक्तो राजसिंहेन भरतो मुनिसत्तमः यथावत्स विचार्यास्य पापं तस्य दुरात्मनः ४ स हान
पाडुच्युत्तिन्याभग्नद्रोहाभिभूतया विनाशं व्रज दुर्बुद्धे इति शापं विसृष्टवान् ततस्तौ राजभरतौ प्रत्यूचतुरिदं वचः ॥ ६

वधं कृत्वा [illegible]

चित्क्षणकालं अथवा सुचिरं वा न पश्यामीत्यर्थः ५५ इति श्रीवशिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे एकोननवतितमः सर्गः ८९
भरतस्य मुनेः शापान्नृपयोरपि देहयोः नमानसी तन्मयता तपोनिष्ठेति कीर्त्यते राजीवं पद्ममिव लोचने यस्य १ अस्ये-
द्रस्य मुखे स्फारे प्रचुरं २ वधस्य वधार्हस्य त्यागात् अवधादपि च तदेव पापं भवतीति धर्मशास्त्रप्रसिद्धमित्यर्थः ३ ४ अ-
नया अहल्यया सह विनाशं स्तु ५ राजभरतौ प्रति इदं वच ऊचतुः ६ ॥ ॥ ॥ ॥ ॥

वीरं दृष्टार्थस्थैर्यस्फुरं ३८ वृषः अनुभूयमानः तद्भावायतिपर्यंतो निश्चयो दृढ निश्चयस्तद्वंतमपि मनोऽसि विशारदं तां विशीर्णां ३९ आ
विषमपि निवेशं दधानं ४०-४१ अचलं स्थिरं ४२ तीव्रवेगेन दृढाभिनिवेशेन अभिवांछितात् दृष्टार्थात् चालयितुं ४३ दृढसंगमादपि
लषितार्थलाभादन्यत्किंचिद्गुणमात्रमपि नानुभवामि तथा च मन एवं वेषद्रूपेन दृढसंगतं मनः स्वभावात्स्वभावांतरं यत्नेशतैरपि गमयि
तुमशक्यमित्याशयेनाह अहल्येति ४७ एककार्यनिविष्टमेकाग्र्यं परं विषयांतरं ४८-४९ सर्वं क्षिप्त्वा विजिष्ठतया स्थितं ननु देहं राजनि जी १

वीरं मनो भेदयितुं मनागपि न शक्यते कानाम तामहाराज कीदृश्यः कस्य शक्यः ३८ याभिर्मलां सिग्धंते दृढनिश्चयवं
तमपि वृद्धिमायाति वा देहो यातु वा विशीर्यतां ३९ भाविनार्थी भिपतितं मनस्तिष्ठति पूर्ववत् दृष्टेर्पि चिरमाविष्टं दधानं त
उत्तमं मनः ५०-भावाभावा शरीरस्यान्यपशक्ता न बाधितुं भावितं तीव्रवेगेन मनसा यत्सम महीपते ५१ नेदं स्वपरूपमचलं न शरीर जे ४
विचेष्टितं न कास्त्र न क्रियाराजन्वरशापादिका अपि ५२ तीव्रवेगेन संपन्नं शक्ताः स्खालयितुं मनः तीव्रवेगेन संयुक्तं पुरुषा सलि
वांछितात् ४३ मनस्खालयितुं शक्ता न महाद्रिं स्रगादिव अमेयमसितापांगी मनः कोशप्रतिष्ठिता ४४ देवागारे महोत्सवे देवी
भगवतीयथा न दुःखमनुगच्छामि प्रियया जीवरत्नया ४५ शिरिरौ भदशादाहं लग्नयेवान्दमालया मन्मन्मयया राजंस्तिष्ठाम
भिपतामिवा ४६ तत्रैव संगमादन्यत् किंचिन्नानुभवाम्परं अहल्या द्रयितानाम्ना मनसे शुभ्रमिधं मनः संसक्तमिदमायाति न स्वभा
वादेतत्परं एककार्यनिविष्टं हि मनो धीरस्य भूपते ४८ न चाल्पते मे रुचिवर शापदलैरपि देहो हि वरशापाभ्यामन्यत्वमिहगच्छति
४९ ननु धीरं मनो राजन्निक्षि गीष्टन पुस्थितं एतानि चान्न मनसां न च कारणानि राजन् शरीरं शकलानि कल्पोत्थितानि चेतो हि
कारणमभीष्टशरीरके पुवारीवसर्वबन्न खंडलता रसेषु ५० आद्यं शरीरमिह विद्धि मनो महान्संकल्पितो जगति तेन शरीरसंघः
आद्येशरीरमभितिष्ठति यत्र यत्र तन्नाज्ञ शं फलति नेतरदस्य पुंसः ५१ ॥ सर्ग ॥ शुभं ॥

व मनसः कारणं देहपीडनेऽकुतोनपीड्यते तत्राह एतानीति एता
ल्पानेकदेशाः मनः शानकारणानि किंतु चेतोमनः एवाभीष्टशरीर
अधितिष्ठति अहमित्यभिमानेनाविर्भवति तेनाधिष्ठानेन न तद्

निपदिदृश्यमानानि प्राप्तानि शरीरलक्षणानि शकलानि क
केष्टकारणमित्यर्थः ५० आद्यं आत्मनः प्रथमं भोगायतनं
शरीरादाकारे फलतीत्यर्थः ५१ ॥ श्रीरामायनमः

वा०टी०
उ०प्र०
२५१

५ एतेऐंदवाः ५ कातर्हिमत्स्र्गस्यावकाशस्तत्राह इहत्त्वचित्ताकाशे अनंतंवैमनः इतिमनः इतिस्मृतेरिभावः प्रथमश्चिदाकाशः चिदाभासाकाशः ६ सात्त्विकूटस्थचिदाकाशप्रतिकाशिताः चित्ताकाशे अनंतकोटिब्रह्मांडानामप्यवकाशोऽस्ति किंपुरेनकस्यैत्याशयेनाह एकस्मिन्निति ७ अवरप्रागुक्तमाकाशचतुष्टय मध्ये ८ तत्रद्वयोरेव सर्गाधारतामुख्येत्याशयेनाह यमश्चेति चिदाकाशे मनोवच्छिन्नः भूताकाशस्य स्वरूपांतःपाताद्भूताकाशस्यासंगतयासर्गानावारत्वादिति ९ ततस्मिन्सर्गेप्रथमोमनुःस्वायंभुवः ११

मनोहिजगतांकर्तृमनोहिपुरुषःस्मृतः यन्मनोनिश्चयकृतंतद्द्रव्यौषधिदंडैः हंतुंनशक्यतेजंतोः प्रतिबिंबमणेरिव तस्मादेतेत्रतिष्ठंतुभासुरेस्सर्गसंभ्रमे ५ त्वस्वष्टेहप्रजास्तिष्ठंतुध्याकाशोह्यनंतकः चित्ताकाशः चिदाकाशआकाशश्चतृतीयकः ६ अनंतात्त्वयस्त्वेतेचिदाकाशप्रकाशिताः एकंचीचीन्बहून्वापिकुरुसर्गंजगत्पते ७ हेछयालतितिष्ठत्वंकिंगृहीतंतवैंदवैः ॥ब्रह्मोवाच॥ अथैंदवजगज्जालेभात्येनेनस्रुदाहृते ८ मयासंचिंतसस्चिरमिदमुक्तंमहामुने युक्तमुक्तंत्वयाभागोविततंहिकेलांबरं ९ मनश्चविततंवापिचिदाकाशश्चविस्तृतः तद्यथाभिमतंसर्गंनित्यकर्मकरोम्यहं १० कल्पयाभिवहून्पाभुभूतजालानिभास्कर तत्वमेवाद्यभगवन्प्रथमोभवमनुर्भव ११ कुरुसर्गयिषाकामंमयासमभिचोदितः अथैतत्समहातेज्ञाममवाकंप्रभाकरः १२ अंगीकृतपद्धिधात्मानंचकारतपतांवरः एकेनप्राक्तनेनास्मिन्वपुषास्तूर्यतांगतः १३ व्योमाध्वगतयासर्गेतितानेद्विवसावत्लिं मन्वंतुत्वंद्वितीयेनकत्वास्ववपुषत्स्रगात् १४ ससर्जसिकलोकस्थितांतामभिमतांमम १५ एतत्तेकथितंसर्वंवसिष्ठमनसोमुने स्वरूपं सर्वकृतंचशक्तत्वंचमहात्मनः १६ प्रतिभासमुपायातियद्यदस्यहिचेतसः ततत्प्रकटतामेतिस्थैर्यंसफलतामपि १७ सामान्यब्राह्मणोभूत्वाप्रतिभासवशात्किल ऐंदवाब्रह्मतांयाताः मनसःपरमसक्ताः १८ पश्यैवैंदवजीवास्तेचितत्वाद्ब्रह्मतांगताः वयंतथैवचिद्भावाच्चितत्वाद्ब्रह्मतांगताः १९ ॥ ॥ ॥ ॥ ॥ राम ॥

248

समभिचोदितः आज्ञामसन्न् १२ तपतांवरेतिवसिष्ठसंबोधनं अस्मिन्नैंदवसर्गे १३ उपसंहरतिएतदितिमहात्मनोमनसः १६ सर्वैंदवमानसंवेवत्याह पश्यतिचिज्जवाञ्छितस्वश्याप्य चित्तवांछिता १९ फलतीभोगाम्बहाश्रयोजकलाश्रि ७ स्वप्नापिविहरेत्पश्यकाशिता २५८

२५१

नर

नौआवयोः किंचिदपिनशपतितत्रहेतुः स्वांतरूपयोरिति ७ नाशितुनाशयितुं सेटिलोपः छांदसः परैर्दुर्लभत्वाच्च ८ पतितो
मतावितियावत् ६ व्यसनेनदृढविषयरागेणसंसक्तोवद्धो १० अथबहुजन्मपरंपरानंतरमस्माकंसर्गेअस्मदीयेब्रह्मांडे ११ भारतो
भरतेनदत्तःशापस्तयोः शरीरमात्रस्यक्रमेणनाशेसमर्थोविभूवनतुमनोनिग्रहे इत्यर्थः १२ वृत्तश्अपिशृंगारचेष्टाकुलिताभवंति

नर

अनेनशापदानेन किंचिद्भवतिनावयोः देहेनष्टेननौकिंचिन्नशपतेस्वांतरूपयोः ७ स्वोतंहिनहिकेनापिशक्यतेना
शितुंकश्चित् सूक्ष्मत्वाच्चिन्मात्वाच्च दुर्लभत्वाच्चविद्धिनौ ८ ॥भानुरुवाच॥ सुमहांस्तेसंवक्तुमनस्कावे बशापतःप
तितौभूतलेरस्ताविच्युताविवपक्षिणौ ९ अथव्यसनसंसक्तौमृगयोनिमुपागतौ ततस्तावपिहितेसक्तौभूयोजातौ
विहंगमौ १० अथोस्माकंविभौसर्गेमिथःस्तेवंधभावनौ तपःपरौमहापुण्यौजातौब्राह्मणदंपती ११ भारतोपित
योशापःससमर्थोवभूवह शरीरमात्राक्रमणेनमनोनिग्रहेप्रभो १२ तावद्यापिहितेनैवमोहसंस्कारहेतुना यत्रय
त्रप्रजायंतेभवतस्तत्रदंपती १३ अकृत्रिमप्रेमरसाद्विद्धस्नेहाःतयोस्तंप्रतिवीस्यकांतं वृत्ताश्अपिप्रेमरसानुविद्धाः
शृंगारचेष्टाकुलिताभवंती १४ ॥मोक्षोपायेषु कविमैंद्राहल्यानुरागोनामनवतितमःसर्गः ९० भानुरुवाच॥
तेनैतदपिभगवन्यथाकालंमनोमुने अनिर्ग्राह्यमभेद्यंचशापैरपिदुरासदैः १ ऐंदवानामनःसृष्टिक्रमाणांप्र
विनाशनं युज्यतेनचतद्युक्तं नैककुमेतन्महात्मनः २ किंतदस्तिजगत्यस्मिन्विविधेषुजगत्सुच तवापिनाप्य
नाप्यस्यायदेव्यायमहात्मनः ॥ ३ ॥ ॥ ० ० ५

किंपुनरन्येइत्यतिशयोक्तिः १४ ॥इतिश्रीवाशिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे नवतितमःसर्गः ९०॥ इहभानुक्तबाधा
तुसर्गोनिरूप्यते मनोमात्रविलासर्वविश्वमोदंवसर्गवत् तेनभारतशापेनमनोनिग्रहेसमर्थोविभूवेत्युक्तेनहेतुना १ अतोहे
तोर्दैदवानांसृष्टिक्रमाणांप्रविनाशनंत्वयकर्तुंनयुज्यतेनपापैतेनमहात्मनस्तावतद्युक्तंउचितंच नभवतीत्यर्थः २तर्हिरथा
समसर्गः स्यादितिदेत्यमालस्याहकिंतदिति ३ ॥ ॥

यदहंरूपमभिनिवेश
वा०टी० पद्युदासीनश्चिज्जादेवसर्वरूकं तर्हि कथं देहादिष्व हंतयाभिमानादनुदासीनरूपं भातीतितत्राहनसदिति
उ०प्र० रूपमनुदादीनस्वभावमनुभूयतेतन्नसत् सर्वत्रचित्कोपिअदर्शनात् नाप्यस न असतः उपलंभादर्शनात् यतः सतासतेतर
२५२ वसन्नासदेकरूपत्वात्सदेव असताचासदेकरूपत्वादसदेव अहंरूपंतुनेकस्वभावनियतंयतः क्वचिदुपलंभेनहेतुनासद्रूपमिव
क्वचित्तुतद्विरोधतोऽनुपलंभादसत्यसद्रूपमितिविरुद्धस्वभावं भासतइतिमायिकमित्यर्थः ३० एवंमनसोजडाजडविरुद्धस्व
भावत्वादपिमायिकत्वमित्याह जडाजडमिति ३१ तस्यकदादृश्यात्मता कदावाब्रह्मरूपत्वंतत्राहदृश्यते तन्मनो दृश्यानुभ
वकलेदृश्यमिवसत्यात्मसद्भावेब्रह्मानुभवेनविलासिनःप्रपञ्चविलसनशीलमितिब्रह्मैवयथाहेमिकटककलंकरालंकृतिः

२९ नसन्नासदहंरूपंसन्नासतेतदेवच उपलंभेनसद्रूपमसत्यंतद्विरोधतः ३० जडाजडंमनोविद्धिसंकल्पात्मदृहदृपुः
अजडंब्रह्मरूपत्वाज्जडंदृश्यात्मनावशात् ३१ दृश्यानुभवसत्यात्मनसद्भावेविलासितत् कटत्वंयथाहेम्नितथा
ब्रह्मणिसंस्थितं ३२ सर्वत्वाद्ब्रह्मणः सर्वंजडंचिन्मयमेवच अस्मदादिशिलांतालनजडंनचचेतनं ३३ दार्वा
दीनासचित्त्वेननोपलंभस्यसंभवः उपलंभोहिसदृशासंबंधादेवजायते ३४ उपलब्धेजडंविद्धितेनेदंसर्वमेवहि॥

कार्यदृशीहेम्नः पृथक्सद्विवक नकदृशात्तुतदेवतद्वत्संस्थितमित्यर्थः ३२ तवजगतोपिजडाजडविरुद्धस्वभावत्वान्मा
यिकात्वमेवेत्याशयेनाह सर्वत्वादिति अस्मदादिशिलांतालब्रह्मादिस्थावरात्मतेये किंकदृशाविरुद्धस्वभावमपिपर
मार्थदृशानजडंअचेतनधर्मकमित्यर्थः ३३ जडंचेतनमितिचव्यवस्था अनुपलंभेउपलंभोत्तरंवास्यात् अपिउपलंभस्ये
वासंभवात्सैवनसिद्ध्यति दूरेजडाजडत्वचिंत्येत्याशयेनाह दार्वादीनामिति सदृशयोः प्रमातृप्रमेयचिद्रूपत्वोर्हि तेद्वारका
देवासंबंधाद्धिदुपलंभः प्रसिद्धः जडैकरूपत्ववादेतुनप्रमेयचेतन्यमस्तीतिनोपलंभसंभवइत्यर्थः द्वितीयेप्याहउप २५२
लब्धेइति अजडंविद्धीतिछेदः उपलब्धेप्रमेयस्योपलंभेतभावात द्विष [illegible] यस्याजडैकस्वभावतापरिशिष्यतेयतः

तद्देवत्वांतंमनएवास्तिदेहदृक्तु देहप्रतीतिधर्मितादात्म्यानास्ति २० आलनिस्वस्मिंश्चमत्काराः कल्पनाः यस्य तथाविधं भवति आ
त्मचमत्कारत्वेऽपि विरणोतितच्चतत्कुरुतेइति तर्हि सर्वेषांमनस्तुल्यंकुतोनकल्पयति तत्राह यथावत्संभवमिति यथावत्कामकर्मवा
सनानुसाराद्यावद्यदासंभवतितदातावदेवेत्यर्थः यथामरीचंकचुनयेवांतः परिणमते निंबस्तुतिकृतयाद्राक्षामधुरतयेतिस्वस्व
संस्काराद्यवस्थितं तद्वदित्यर्थः २१ अतएवस्वोऽहंमनुष्योऽहमित्यादिदेहनाम्ना प्रतिनियतं जनाउदाहरंति नैकरूपमित्याह त
दतदिति चितवक्रांतिआतिवाहिकनामकंस्वस्वदेहमेयघनभ्रमं स्थौल्यभ्रांतियुक्तंततदेहनाम्नाउदाहरंति २१ यदिचित्तंदेहस्त
र्हि इदमेवजीवइतिकथंप्रागुक्तं तत्राह कथ्यतेइति प्रतनुवासनंजीवः घनभ्रमंतुदेहइत्युच्यतइतिभेदः क्रमाच्छांतदेहत्रयचम

चित्तंहिप्रतिभासात्मयच्चतत्प्रतिभासनं तदिदंभातिदेहादिस्वांतंनान्यास्तिदेहधृक् २० चित्तमालचमत्कारंतच्चतत्कुरु
तेयत न यथावत्संभवंस्वात्मन्येवांतर्मरिचादिवत् २१ तदेतच्चितवक्रांतमातिवाहिकनामकं तदेवोदाहरंत्येवदेह
नाम्नाघनभ्रमं २२ कथ्यतेजीवनाम्नेतच्चित्तंप्रतनुवासना शांतदेहचमत्कारंजीवंविद्धिक्रमात्परं २३ नाहंनचान्य
दस्तीह चित्रंचितमिदंस्थितं वसिष्ठेदंवसंविद्धदसत्यता भिवागतं २४ यथेदंवमनोब्रह्मात्पैवापमहंस्थितः तत्कृतं
चाहमेवेदंसकलात्मैवभासते २५ कश्चिच्चित्तविलासोयंब्रह्माहमिहसंस्थितः स्वभावएवदेहादिविद्धिस्पष्टतरात्म
त्वात् २६ श्रुत्वाचित्परमार्थैकरूपिणीत्येवभावनात् जीवोभूयोभयोभूत्वाक्तीत्यंदेहतामुधा २७ सर्वमेवंदवसंसार
वदिदंभातिचिद्वपुः संपन्नसंप्रबोधात्मात्मस्वप्नोदीर्घः स्वशक्तिजः २८ द्विचंद्रविभ्रमाकारंतन्मात्राभासएवकंरंद
२ वांवरवंदचित्तादेवाखिलंभवेत् २९ ,, ,, ,, ,, ,, ,, ,, ,,

त्कारंतुपरंब्रह्मविद्धीत्यर्थः २३ एवंचतंतुभ्यः पटइवनकस्यापिदेहोनामपृथगस्तीत्याह नाहमिति २४ तत्कृतंसर्गेतरमित्य
पिमच्चित्तकल्पनेवेत्याह मेवतदर्पीत्याह तत्कृतमिति २५ स्वभावः परमात्मैव सर्वप्रपंचस्पष्टतरात्मत्वात्सर्वगिवदेहादिभा
वेनभातीत्यर्थः २६ श्रु घेतिनिपातोनत्वर्थे २७ चिद्वपुः परमात्मैवएवंदवसंसारवत्सर्वात्माभाति यथात्वाज्ञानशक्तिजः स्वप्नः दीर्घ

संपन्नजाग्रदात्माभातितत्वदित्यर्थः २८ यतः सङ्कल्पितवासना
प्रपञ्चत्तन्मात्राभासएवकंश्रवृत्तिजगतत्तौद्रवतिचक्षुरारूपेष्वदृष्टे
मितिमात्रतइदम् २९

दा २

५ किंचासत्वादपि देहादेर्न शोधनार्हतेत्याह यदीति तद्बोधः फलवानिति शेषः स्वेकाल्पिताः पादपाः के
शोध्यमाना दृष्टा इत्यर्थः

वा०री०
उ०प्र०
२५३

सर्वशक्तीः आविष्कुर्वाणम चित्तविज्ञानानन्दरूपं साम्प्रतं नैनेति ४६ नागात्मक चिन्नलक्षणो देह आतिवाहिकः ४७ कथं
मिदं बोद्धुं शक्यं तत्रोपायमाह देहादीति स्थूलदेहादिदेहत्रय प्रतिभारूपालतांच सजतासतां अधिकारिणा चितैनैव
चितं प्रतिभासात्म प्रातिभासिकं विचार्यमित्यर्थः ४८ किंतद्विचारलक्षणे शोधे कृते चित्तं भवतितदाह चेतेति अकृत्रि
मो निरतिशय आनंदः प्राप्यत इति शेषः तर्हि देहादयोपि शोध्यंतां ततोपि पुरुषार्थः किं न लभ्यते तत्राह किमि
तिवृथा तत्बोध इत्यर्थः ४९ एतां विद्यां प्रतिग्रह शोधनाग्रहोयुक्त उचितः स्यादित्यर्थः अत एव ह्यात्मादिशब्दादेहे

चित्स्येव चेत्यते जाड्यं स्वप्नेस्वमरणोपमं सर्वात्मत्वात्सर्वशक्तीः कुर्वती नैति साम्प्रतं ४६ मनः पदार्थादितया
सर्वरूपं विजृंभते नानात्म चितदेहोयमाकाशविशदाकृतिः ४७ देहादिदेहप्रतिभारूपात्म्यं स्पजता सता नि
वार्यं प्रतिभासात्म चितं चितेनवेक्ष्यं ४८ चितं तास्मे शोधिते हि परमार्थ स्वरूपिणीं गते कृत्रिम आनंदः किं देहो
पलखंडकैः ४९ यद्विघते शोध्यते तद्बोधः केचखपादपाः देहाद्य विद्यासत्याचे द्युक्तरणाम्प्रतिग्रहः ५०
असत्यविनि विष्टानां देहवाचितया त्विह येनात्मादिसंत्पत्तज्ञा किं चितपुरुषेडकाः ५१ यथेतद्भावयेत्स्वांत
स्तथैव भवति क्षणात् दृष्टांतो चैर्वाहल्याकृत्रिमेंद्रादिनिश्चयः ५२ यद्य यथास्फुरति स्वप्रतिभात्मचित्तं तत्
तथा भवति देहतयोदितात्मन् देहोयमस्ति न च चाहमिति स्वरूपं विज्ञानमेकमवगम्य निरिच्छमास्व ५३ ॥

५३ यथुक्तापि प्रभुतेन देहवाचिनः श्रुतेरसत्यार्थनिष्ठत्वायोगात् येत्वसत्यविनिविष्टा देहात्मदृढनिश्चया श्रावकियामं
दरादयो देहवाचिनएवात्मादिशब्दा इति मन्यंते तेषां येकिंचिदपि प्रामाणिकं वस्तूपदिशंतीति अज्ञाः पुरुषेडकाः पुंस्य
शब्द एव आत्मादिसत्यवस्तुनिष्ठशब्दानां देहाद्यसत्यवाचितया विपरीत बुत्पन्नान्प्रतिसत्यार्थबोधनाशक्ते रित्यर्थः ५१ क
पंतहेमकृत्तस्यचित्तस्यमूर्तदेहभावः संपन्न इति चेद्भावनयैवत्पाशयेनाह यथेतदिति ५२ उक्तमेवार्थं स्फुटं वदन्नुपसंह

250

२५३

उभयदुर्घटत्वेनयत्कलितंतदाहजडेति ३६ तस्याश्चितश्चेत्यकाकारकलनैवमननंतस्मात्तद्विवेकएवनिर्मनस्कतेत्याशयेनाहचित
इत्यादिना ३७ तत्रचिदात्मभागविस्मरणेनजडात्मजीवजगद्भ्रमः संपन्नइत्याहइतिजीवइति ३८ भ्रुक्तोभावश्चित्स्वभावएवचित्तं
जगदितिद्विधाकृतः अतश्चितेकबुध्योपलब्धंसर्वंजगत्साचिदेवद्वैतबुध्यालब्धमपितत्सैवेत्यर्थः ३९ निर्भागाएकभागाभं
स्वगतविभागतुल्यं ४० भ्रमभाकुनापुरुषेणैव ४१ अस्याश्चितेः सर्वरूपंजाड्यमपिचितिरेवस्मात् यतस्तस्मिन्जाड्येचित्वंचवे
त्सि अचिदेकस्वभावत्वेस्फुरणायोगात्स्फुरणेजाड्यस्याप्यसिद्धेरित्यर्थः यथाजडेबोधोस्ति एवंचेतनेजडभोगोप्यस्तीति

जडंचेतनभावादिशब्दार्थश्रीर्नविद्यते अनिर्देश्यपदेयत्रलतादीवमहामरौ ३६ चितोयच्चेत्यकलनंतन्मन
स्त्वमुदाहृतं चिद्भागोत्रजडभागोजाड्यमत्रहिचेत्यता ३७ चिद्भागोत्रावबोधांशोजडंचेत्यमिहस्यते इतिजीवो ६२
जगद्भ्रांतिंपश्यतीद्धतिलोलतां ३८ चित्तस्यएवभावोसौशुद्धएवद्विधाकृतः अतःसर्वजगत्सैवद्वैतलब्धंचसैव
तत् ३९ स्वमेवान्येतयादृष्टाचितिर्दृश्यतयावपुः निर्भागाप्येकभागाभंभ्रमतीवभ्रमातुरा ४० नभ्रांतिरस्तिभ्रम
भाड्मानेवेतीहनिश्चयः परिपूर्णार्णवप्रख्याक्तीत्यंसंस्थिताचितिः ४१ सर्वस्याजाड्यमप्यस्याचितिश्चित्त्वंचवेत्सि
तत् चिद्भागोंशोऽवबोधस्यत्वहंताजडतोदयः ४२ अहंतादिपरेतत्वेमनागपिनविद्यते कुर्म्यादीवपृथक्तोयेसंवि
त्सारेहितघतः ४३ अहंप्रत्ययसंदृश्यंचैत्यंविद्धिसमुत्थितं स्वगतस्वांविभ्रांतस्थंन्नंविद्यतएवनो ४४ अहंतापद
मंतात्मपदंविद्धिनिरामयं विदंविदुरहंतादिशैलमध्यथाहिमं ४५ ॥ ॥१ ॥३ ॥ ॥१॥

दर्शयति अहंतेति ४२ कथमहंताजडत्वमितिचेद्भूलत्वांकत्वादित्याहअहंतादीतिसंवित्सारंचिदेकरसं ४३ अतएवतस्या
सत्वमपीत्याहअहंप्रत्ययेति ४४ अनात्मपदंसर्वद्वैतवाधावध्यात्मवस्तुअहंतायाः अपदंअनात्मविद्धिकुर्वीति विदंवि
स्वभावमेववासनयाघनीभूतमहंतादिरूपंजनाविदुःपश्यंति यथाशैत्यमेवघनोभावाद्धिमपश्यंतितद्वदित्यर्थः ४५ ॥ ॥

तत्रापि दोषांतरमाह एकनाशे इति एकनाशे द्वयोर्नाशोऽवश्यमुपपद्यते यथा मनोनाशे देहपरिक्षयो दृष्ट एवं देहनाशे मनःपरिक्षयो पि संभावित इति न देहस्य मनो न्यूनता किंतु समसत्ताकता प्र[illegible] सुतं च दृष्टराघगम्यत्वे सत्यपरोक्षविषयत्वात्स्वप्नादिवन्मनस एव देह न्यूनसत्ताकतेति रज्जुनाशे सर्पस्येव देहनाशेन मनो नाशस्यानसंभव इति भावः ६ तत्र प्रथमं विरोधं परिहर्तुं वरशापप्राच लोक्ये शेत्सर्गिकत्वं बहुतरदृष्टानुसाराद्वश्यमभ्युपेयमित्युपपादयितुं वरशापयोरप्युपजीव्यकर्माणि ह्यलितपौरुषप्राबल्यं

एकनाशे द्वयोरेव नाशोऽत्राप्युपपद्यते अवश्यं भवितुं मनोनाशे देहपरिक्षयः ६ मनःशापादिभिर्दोषैः कथं नाक्रम्यते प्रभो

५२ कथमाक्रम्यते वासौ पितुर्हि मे परमेश्वरः ॥ वसिष्ठोवाच ॥ न तदस्ति जगत्कोशे शुभकर्मानुपातिना यत्पौरुषेण शुद्धेन न

समासाद्यते जनैः ८ आब्रह्मस्थावरान्तं च सर्वदा सर्वजातयः सर्वेषां च जगत्यस्मिन्द्विशरीराः शरीरिणः ९ एकं मनः

शरीरं तु क्षिप्रकारि सदाचलं अकिंचित्करमन्यत्तु शरीरं मांसनिर्मितं १० तत्राभ्यासंसमयः सर्वस्यैव च संगतः सर्वैरा

क्रम्यते शापैस्तथा विद्यादिसंचयैः ११ मूकप्रायो ह्यशक्तोऽसौ दीनः क्षणविनश्वरः पद्मपत्राम्बुचपलो दैवादिविवशा

स्थितिः १२ मनो नाम द्वितीयोऽयं कायः कायवतामिह असाध्यं तापि नायतो भूतानां भुवनत्रये १३ पौरुषं स्वमवष्टभ्य धै

र्यमालंब्य शाश्वतं यदि तिष्ठत्यगम्योऽसौ दुःखानां तदनिंदितः १४ यथा यथासौ यतते मनो देहादि देहिनां तथा तथा

तावत्स्मारयति न तदिति ८ स्थूलस्यैवोपघातो दृष्टो न सूक्ष्मस्येति लोकदृष्टानुसारं लोके विकुं भिन्नस्य भावो धैर्य दर्शयति आब्रह्मे त्यादिना ९ १० विद्याभिचारं कृत्याद्यः आदिप[illegible]दाच्छस्वविद्यादयो गृह्यंते तेषां संचयः समूहैः ११ देवादीत्यादिपदा द्राजपित्रादिसंग्रहः १२ आयतः स्वाधीनः नायतोऽस्वाधीनः १३ तत्र स्वाधीनतां हेतुत्वोपपादयति पौरुष मिति अगम्यो नाक्रमणीयः तैर्दुःखहेतुभिरनिंदितः अदूषितः १४ दुःखानुपघातइव सुखोपचयोऽप्यस्य वर्जित इत्याहयथेति १५

देहोमानुषादिरयंप्रत्यक्षएषदेहभोग्यःप्रपंचः अयंइतिस्वभावात् स्वकल्पनावशाद्यमालाद्देहएवभवतिएतदखिलंभोग्यंच
भवति ततस्तद्भावाद्देहनाशमनुनाशंएतियथायंबालः कपायियुक्त्यानियंसंगतदेहेसन्नपिपक्षतद्भीषणत्वग्रसितत्वादि-
कल्पनवशाद्यक्षेणग्रस्तोपन्नदेहगतःस्वप्नादोभवतितद्वदित्यर्थः ५५ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउत्पत्तिप्रकरणेएक
नवतितमःसर्गः ९१ इहाक्षिप्यमनःशक्तिरमोघास्याप्यतेदेहं दार्ढ्यप्रकृष्यत्वस्यपेशारोपणत्तमा १ प्राक्तनंवास्पंभ्र
उपपत्युद्भावनेनाक्षिप्यपुनर्मयाएष्टः २ आक्षेपप्रकारमेवदर्शयतित्वयैवेति अतत्त्वाद्युक्तिविरुद्धेत्यर्थः २ एवंलोकदृष्ट
देहायमेषचकिलायमितिस्वभावोदेहोमयेतदखिलंततएतिनाशं मन्त्रादिकल्पनवशाद्यमेतिवालोनिर्य
क्षेदेहगतस्यएवकयापियुक्त्या ५५ ॥मोक्षोपायेश्रीवाल्मीकिवतरणक्रमोपदेशोनामएकनवतितमःसर्गः ९१ श्रीव
शिष्ठउवाच ॥ इत्युक्तवान्सभगवान्सपाकमलसंभवः १ दूहूहःपुनःपृष्टोवाक्यमाक्षिप्यभूतयः १ त्वयैवभ-
गवन्प्रोक्ताःशापमंत्रादिशक्तयः अमोघाइतिताएवकथंमोघाकृतापुनः शापेनमंत्रवीर्येणमनोबुद्धीद्रि-
यारापि सर्वाणिविमूढतामोहस्थानिकिलजंतुषु ३ यथैतोपवनस्पंदोयथास्नेहतिलोयथा अभिन्नोतद्व-
देवैतोमनोदेहोसरएवतत् ४ अथनास्तीहवादेहःकेवलंचेतसेवसः मुधानुभूयतेस्वप्नमृगदृष्णाद्धिचंद्रवा
विरोधोपीत्याह शापेनेति तथाच नहुषस्यशापादजगरत्वंप्राप्तस्यमनोमोहात्स्ववंशजस्यभीमस्यग्रसनेप्रवृत्तिः तथैव
धार्मिकस्यापिसौदासस्यशापाद्राक्षसतांगतस्यबुद्धिमोहाद्वसिष्ठवधोद्योगप्रवृत्तिः गंधर्वराजस्यचशापाद्धृतराष्ट्रजन्मनि
चक्षुरिंद्रियनाशः एवमन्यत्रापिद्रष्टव्यइत्यर्थः एवंकार्यविरोधोपपत्तीरुपाशयेनाह यथैत्यादिना त्रितीयपद्याशङ्कोव
क्षोदृस्यादिदृष्टान्तानरसंग्रहार्थः कार्यकारणयोर्भेदानिरूपणात् तथाचमनसोवरशापाद्यनाक्रमणेतदभिन्नेदेहेपि
तदनाक्रमणंस्यादित्याशयः ४ ननुदेहस्यमनोन्यूनसत्ताकत्वाद्देहशापाद्याक्रमणेपिनमनसस्तन्मसक्तिरितिविवक्षवा [illegible]

वा॰टी॰ विवेकपौरुषहठेनतु मनसि नाभिलषितं तत्तदिति दित्याह कदाचिदिति दृष्टे जाग्रति वा २७ ईषत्प्रतिभातमपि मनसि चिरं निरूढं पीनं सत्य
उ॰प्र॰ थाभूतं सत्यमिवोपभोगसमं भवतीत्यर्थः २८ ननु पूर्वतनस्मरणाख्यादिभावप्रतिभादार्ढ्ये दृढं वा देश स्थितिरपि कुतो नाभूत्तत्राह प्रति
२५५ भासस्येति उत्तरदृढवासनया पूर्ववासनोपमर्दं छन्नत्वं इति भावः ३० पूर्ववासनोपमर्देनापक्षीणस्योपासनस्य कर्मकार्यं तस्य समतामत्रा
हप्रतिभासेति विरोधिभंजनपर्यंतमेव स्वकार्यं विलंबतस्तदुत्तरं तु क्षणादेव निष्प्रत्यूहत्वाद्दोषवासनिकप्रतिभासगोचरो यास्यार्थितां ए
ति प्राप्नोत्येवेति नोपपद्यत इति भावः ३१ ननु तथापि प्रलयकाले कथं तद्धितदुत्सर्गकल्पनं तेषां तत्राह अनुसंधानमात्रेणेति नतदी

न कदाचन संसारे सावधानमनामनाक् स्वप्नेपि कस्मिंश्चिद्दृष्टेपवादोषजालैः विलीकृतः २७ मनस्येवमनस्तस्मात्सो
रूपेण पुमानिह स्वकमेव स्वकैनैव योजयेत्यावनेपष्यि २८ प्रतिभातं यदेवास्य यथाभूतं भवत्यलं क्षणादेव मनःपी
नं वालवेतालवन्मुने २९ प्रतिभासस्यानुपदं प्राक्तनीं स्थितिमुज्झति कुलालकर्मानुपदं घटो मृत्पिंडतामिव ३० प्र
२५२ तिभासार्थतामेति क्षणादेव मनो मुने स्पंदमात्रात्मकं वारि यथा तुंगतरंगतां ३१ अनुसंधानमात्रेण स्वर्पविंवेपि
पामिनी मनः पश्यत्यसद्दुद्धाम्भ्रोद्भविवेष्ठितामिव ३२ यत्पश्यति तदेवाशु फलीभूतमिदं मनः सहहर्षविषादाभ्यां
भुंक्ते तस्मात्तदेव तत् ३३ प्रतिभानुपदं चेतः श्रेद्ध्यग्निशिखाशतं दह्यादाहमवाप्नोमीति दग्धं च परितप्यते ३४ ॥

सर्ग यसर्वत्विदीयस्थं किंचिदनुकूलं प्रतिकूलं वा तत्र तदीयानुसंधानमात्रस्यानुवृत्तेः इति न प्रलयकालेपि तद्विरोध इति भावः
अप्रबुद्धस्तोगल्पवषृध्यदष्टिः ३२ सप्तत्ववत्प्रोक्तत्वमपि मनस एवेत्याह यदिति तदेव तत् यत्कर्तृ तदेव भोक्तृ इत्यर्थः ३३
उक्तमर्थमुदाहरणेन दर्शयितिप्रमेति प्रतिभा अनुसंधानं भोजकादृष्टोद्बोधितसंस्कारस्तदनुपदं तदुद्बुद्धं तत्साक्षात् तथा च वि
रहिणां प्रसिद्धमित्यर्थः ३५ ॥ ॥ ॥

स्थूलदेहस्यतुनायंक्रम इत्याह १६ विषयदोषैर्हिमनोदुष्येन्नान्यदोषेणेत्याशयेनाहपवित्रमिति तथाचनलोकदृष्टविरोधशं
कावसरइतिभावः १७ कायविराधमपिपरिहरतितत्विति १८ सर्वेषांदेहादिभावनाद्युपमर्द्देनेपिपुरुषातिशयः प्रयत्नः सर्वैः
सम्यक्अविघ्नेनफलंददातितद्ददाति तन्मनएवमनसः फलंददातिपौरुषस्यापिमनोभेदत्वादित्यर्थः १९ यत्रविषयेदोषेऽपिम-
नोदार्ढ्यं दुःखादर्शनंतत्त्वचय विषयेकिंवाच्यमित्याशयेनेंद्रोपाख्यानादिस्मारयतिपौरुषेणेतिमांडव्यस्यकथामहाभारतादौप्र
सिद्धाः २१ दीर्घतयाऽप्रियस्तुकामोयागोपकरणोपार्जनायनिर्जितोदैवादंधकूपेनिपतितस्तत्रयागकाला तिक्रमेप्रसक्तेमनसैवे

सफलोमांसदेहस्यनकश्चित्पौरुषक्रमः मनोदेहस्यसफलंसर्वमेवस्वचेष्टितं १६ पवित्रमनुसंधत्ते चेतःस्मरतिसर्व
दा निष्फलास्तत्रशापाद्याः शिलायामिवसायकाः १७ पततंभवसिवन्हौवाकर्द्दमेशरीरकं मनोयदनुसंधत्ते तदेवाप्नो-
तितत्क्षणात् १८ पुरुषातिशयः सर्वैः सर्वभावोपमर्द्दने ददात्यविघ्नेनफलंमनोहिमनसोमुने १९ पौरुषेणैवलेनांतश्चि
त्तेकृत्वाप्रियामयं कृत्रिमेंद्रेणदुःखार्तिर्नदृष्टासामनागपि २० पौरुषेणमनःकृत्वानीरागंविगतज्वरं मांडव्येनजिताः
